# ॥ મહોપનિષત્ ॥

.. Maha Upanishad ..

sanskritdocuments.org

August 20, 2017

# .. Maha Upanishad ..

## ॥ મહોપનિષત્ ॥

## Sanskrit Document Information

Text title : Maha Upanishad

File name : maha.itx

Category : upanishhat

Location : doc_upanishhat

Author : Vedic Tradition

Language : Sanskrit

Subject : philosophy/religion

Transliterated by : Sunder Hattangadi (sunderh at hotmail.com)

Proofread by : Sunder Hattangadi (sunderh at hotmail.com)

Description-comments : 61 / 108; Sama Veda Samanya upanishad

Latest update : June 24, 2000

Send corrections to : Sanskrit@cheerful.com

Site access : http://sanskritdocuments.org

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

August 20, 2017

*sanskritdocuments.org*

# ॥ મહોપનિષત્ ॥

યન્મહોપનિષદ્વેદ્યં ચિદાકાશતયા સ્થિતમ્ ।
પરમાદ્વૈતસામ્રાજ્યં તદ્રામબ્રહ્મ મે ગતિઃ ॥

ૐ આપ્યાયન્તુ મામાઙ્ગાનિ વાક્પ્રાણશ્ચક્ષુઃ
શ્રોત્રમથો બલમિન્દ્રિયાણિ ચ ॥ સર્વાણિ સર્વં બ્રહ્મોપનિષદં
માહં બ્રહ્મ નિરાકુર્યાં મા મા બ્રહ્મ નિરાકરોદનિરકરણમ-
સ્ત્વનિરાકારણં મેસ્તુ તદાત્મનિ નિરતે ય ઉપનિષત્સુ ધર્માસ્તે
મયિ સન્તુ તે મયિ સન્તુ ॥

ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥

અથાતો મહોપનિષદં વ્યાખ્યાસ્યમસ્તદાહુરેકો હ વૈ નારાયણ
આસીન્ન બ્રહ્મા નેશાનો નાપો નાગ્નીષોમૌ નેમે દ્યાવાપૃથિવી ન
નક્ષત્રાણિ ન સૂર્યો ન ચન્દ્રમાઃ । સ એકાકી ન રમતે । તસ્ય
ધ્યાનાન્તઃસ્થસ્ય યજ્ઞસ્તોમમુચ્યતે । તસ્મિન્પુરુષાશ્ચતુર્દશ
જાયન્તે । એકા કન્યા । દશેન્દ્રિયાણિ મન એકાદશં તેજઃ ।
દ્વાદશોઽહઙ્કારઃ । ત્રયોદશકઃ પ્રાણઃ । ચતુર્દશ આત્મા ।
પઞ્ચદશી બુદ્ધિઃ । ભૂતાનિ પઞ્ચ તન્માત્રાણિ । પઞ્ચ મહાભૂતાનિ ।
સ એકઃ પઞ્ચવિંશતિઃ પુરુષઃ । તત્પુરુષં પુરુષો નિવેશ્ય નાસ્ય
પ્રધાનસંવત્સરા જાયન્તે । સંવત્સરાદધિજાયન્તે । અથ પુનરેવ
નારાયણઃ સોઽન્યત્કામો મનસાધ્યાયત । તસ્ય ધ્યાનાન્તઃસ્થસ્ય
લલાટાત્ત્ર્યક્ષઃ શૂલપાણિઃ પુરુષો જાયતે । બિભ્રચ્છ્રિયં યશઃ
સત્યં બ્રહ્મચર્યં તપો વૈરાગ્યં મન ઐશ્વર્યં સપ્રણવા વ્યાહૃતય
ઋગ્યજુઃસામાથર્વાઙ્ગિરસઃ સર્વાણિ છન્દાંસિ તાન્યઙ્ગે
સમાશ્રિતાનિ । તસ્માદીશાનો મહાદેવો મહાદેવઃ । અથ પુનરેવ
નારાયણઃ સોઽન્યત્કામો મનસાધ્યાયત । તસ્ય ધ્યાનાન્તઃસ્થસ્ય
લલાટાત્સ્વેદોઽપપત્ । તા ઇમાઃ પ્રતતા આપઃ । તતસ્તેજો હિરણ્મયમણ્ડલમ્ ।
તત્ર બ્રહ્મા ચતુર્મુખોઽજાયત । સોઽધ્યાય્ત્ । પૂર્વાભિમુખો ભૂત્વા
ભૂરિતિ વ્યાહૃતિર્ગાયત્રં છન્દ ઋગ્વેદોઽગ્નિર્દેવતા । પશ્ચિમાભિમુખો
ભૂત્વા ભુવરિતિ વ્યાહૃતિસ્ત્રૈષ્ટુભં છન્દો યજુર્વેદો વાયુર્દેવતા ।
ઉત્તરાભિમુખો ભૂત્વા સ્વરિતિ વ્યાહૃતિર્જાગ્રતં છન્દઃ સામવેદઃ સૂર્યો

દેવતા । દક્ષિણાભિમુખો ભૂત્વા મહરિતિવ્યાહૃતિરાનુષ્ટભ
છન્દોઽથર્વવેદઃ સોમો દેવતા ।
સહસ્રશીર્ષં દેવં સહસ્રાક્ષં વિશ્વસમ્ભુવમ્ ।
વિશ્વતઃ પરમં નિત્યં વિશ્વં નારાયણં હરિમ્ ।
વિશ્વમેવેદં પુરુષસ્તદ્વિશ્વમુપજીવતિ ।
પતિં વિશ્વેશ્વરં દેવં સમુદ્રે વિશ્વરૂપિણમ્ ।
પદ્મકોશપ્રતીકાશં લમ્બત્યાકોશસંનિભમ્ ।
હૃદયં ચાપ્યધોમુખં સન્તત્યૈ સીત્કરાભીશ્ચ ।
તસ્ય મધ્યે મહાનર્ચિર્વિશ્વર્ચિર્વિશ્વતોમુખમ્ ।
તસ્ય મધ્યે વહ્નિશિખા અણીયોર્ધ્વા વ્યવસ્થિતા ।
તસ્યાઃ શિખાયા મધ્યે પરમાત્મા વ્યવસ્થિતા ।
સ બ્રહ્મા સ ઈશાનઃ સેન્દ્રઃ સોઽક્ષરઃ પરમઃ સ્વરાડિતિ મહોપનિષત્ ॥

ઇતિ પ્રથમોધ્યાયઃ ॥ ૧॥

શુકો નામ મહાતેજાઃ સ્વરૂપાનન્દતત્પરઃ ।
જાતમાત્રેણ મુનિરાડ્ યત્સત્યં તદવાપ્તવાન્ ॥ ૧॥

તેનાસૌ સ્વવિવેકેન સ્વયમેવ મહામનાઃ ।
પ્રવિચાર્ય ચિરં સાધુ સ્વાત્મનિશ્ચયમાપ્તવાન્ ॥ ૨॥

અનાખ્યત્વાદગમ્યત્વાન્મનઃષષ્ઠેન્દ્રિયસ્થિતેઃ ।
ચિન્માત્રમેવમાત્માણુરાકાશાદપિ સૂક્ષ્મકઃ ॥ ૩॥

ચિદણોઃ પરમસ્યાન્તઃ કોટિબ્રહ્માણ્ડરેણવઃ ।
ઉત્પત્તિસ્થિતિમભ્યેત્ય લીયન્તે શક્તિપર્યયાત્ ॥ ૪॥

આકાશં બાહ્યશૂન્યત્વાદનાકાશં તુ ચિત્ત્વતઃ ।
ન કિંચિદ્યદનિર્દેશ્યં વસ્તુ સત્તેતિ કિંચન ॥ ૫॥

ચેતનોઽસૌ પ્રકાશત્વાદ્વેદ્યાભાવાચ્છિલોપમઃ ।
સ્વાત્મનિ વ્યોમનિ સ્વસ્થે જગદુન્મેષચિત્રકૃત્ ॥ ૬॥

તદ્ભામાત્રમિદં વિશ્વમિતિ ન સ્યાત્તતઃ પૃથક્ ।
જગદ્ભેદોઽપિ તદ્ભાનમિતિ ભેદોઽપિ તન્મયઃ ॥ ૭॥

સર્વગઃ સર્વસમ્બન્ધો ગત્યભાવાન્ન ગચ્છતિ ।

નાસ્ત્યસાવશ્રયાભાવાત્સદ્રૂપત્વાદથાસ્તિ ચ ॥ ૮॥

વિજ્ઞાનમાનન્દં બ્રહ્મ રાતેર્દાતુઃ પરાયણમ્ ।
સર્વસંકલ્પસંન્યાસશ્ચેતસા યત્પરિગ્રહઃ ॥ ૯॥

જાગ્રતઃ પ્રત્યયાભાવં યસ્યાહુઃ પ્રત્યયં બુધાઃ ।
યત્સંકોચવિકાસાભ્યાં જગત્પ્રલયસૃષ્ટયઃ ॥ ૧૦॥

નિષ્ઠા વેદાન્તવાક્યાનામથ વાચામગોચરઃ ।
અહં સચ્ચિત્પરાનન્દબ્રહ્મૈવાસ્મિ ન ચેતરઃ ॥ ૧૧॥

સ્વયૈવ સૂક્ષ્મયા બુદ્ધ્યા સર્વં વિજ્ઞાતવાઞ્છુકઃ ।
સ્વયં પ્રાપ્તે પરે વસ્તુન્યવિશ્રાન્તમનાઃ સ્થિતઃ ॥ ૧૨॥

ઇદં વસ્ત્વિતિ વિશ્વાસં નાસાવાત્મન્યુપાયયૌ ।
કેવલં વિરરામાસ્ય ચેતો વિષયચાપલમ્ ।
ભોગેભ્યો ભૂરિભઙ્ગેભ્યો ધારાભ્ય ઇવ ચાતકઃ ॥ ૧૩॥

એકદા સોઽમલપ્રજ્ઞો મેરાવેકાન્તસંસ્થિતઃ ।
પપ્રચ્છ પિતરં ભક્ત્યા કૃષ્ણદ્વૈપાયનં મુનિમ્ ॥ ૧૪॥

સંસારાડમ્બરમિદં કથમભ્યુત્થિતં મુને ।
કથં ચ પ્રશમં યાતિ કિં યત્કસ્ય કદા વદ ॥ ૧૫॥

એવં પૃષ્ટેન મુનિના વ્યાસેનાખિલમાત્મજે ।
યથાવદખિલં પ્રોક્તં વક્તવ્યં વિદિતાત્મના ॥ ૧૬॥

અજ્ઞાસિષં પૂર્વમેવમહમિત્યથ તત્પિતુઃ ।
સ શુકઃ સ્વકયા બુદ્ધ્યા ન વાક્યં બહુ મન્યતે ॥ ૧૭॥

વ્યાસોઽપિ ભગવાન્બુદ્ધ્વા પુત્રાભિપ્રાયમીદૃશમ્ ।
પ્રત્યુવાચ પુનઃ પુત્રં નાહં જાનામિ તત્ત્વતઃ ॥ ૧૮॥

જનકો નામ ભૂપાલો વિદ્યતે મિથિલાપુરે ।
યથાવદ્વેત્ત્યસૌ વેદ્યં તસ્માત્સર્વમવાપ્સ્યસિ ॥ ૧૯॥

પિત્રેત્યુક્તઃ શુકઃ પ્રાયાત્સુમેરોર્વસુધાતલમ્ ।
વિદેહનગરીં પ્રાપ જનકેનાભિપાલિતામ્ ॥ ૨૦॥

આવેદિતોઽસૌ યાષ્ટીકૈર્જનકાય મહાત્મને ।

દ્વારિ વ્યાસસુતો રાજઞ્છુકોઽત્ર સ્થિતવાનિતિ ॥ ૨૧॥

જિજ્ઞાસાર્થં શુકસ્યાસાવાસ્તામેવેત્યવજ્ઞયા ।
ઉક્ત્વા બભૂવ જનકસ્તૂષ્ણીં સપ્ત દિનાન્યથ ॥ ૨૨॥

તતઃ પ્રવેશયામાસ જનકઃ શુકમઙ્ગણે ।
તત્રાહાનિ સ સપ્તૈવ તથૈવાવસદુન્મનાઃ ॥ ૨૩॥

તતઃ પ્રવેશયામાસ જનકોઽન્તઃપુરાજિરે ।
રાજા ન દૃશ્યતે તાવદિતિ સપ્તદિનાનિ તમ્ ॥ ૨૪॥

તત્રોન્મદાભિઃ કાન્તાભિર્ભોજનૈર્ભોગસંચયૈઃ ।
જનકો લાલયામાસ શુકં શશિનિભાનનમ્ ॥ ૨૫॥

તે ભોગાસ્તાનિ ભોજ્યાનિ વ્યાસપુત્રસ્ય તન્મનઃ ।
નાજહ્રુર્મન્દપવનો બદ્ધપીઠમિવાચલમ્ ॥ ૨૬॥

કેવલં સુસમઃ સ્વચ્છો મૌની મુદિતમાનસઃ ।
સમ્પૂર્ણ ઇવ શીતાંશુરતિષ્ઠદમલઃ શુકઃ ॥ ૨૭॥

પરિજ્ઞાતસ્વભાવં તં શુકં સ જનકો નૃપઃ ।
આનીય મુદિતાત્માનમવલોક્ય નનામ હ ॥ ૨૮॥

નિઃશેષિતજગત્કાર્યઃ પ્રાપ્તાખિલમનોરથઃ ।
કિમીપ્સિતં તવેત્યાહ કૃતસ્વાગત આહ તમ્ ॥ ૨૯॥

સંસારાડમ્બરમિદં કથમભ્યુત્થિતં ગુરો ।
કથં પ્રશમમાયાતિ યથાવત્કથયાશુ મે ॥૩૦॥

યથાવદખિલં પ્રોક્તં જનકેન મહાત્મના ।
તદેવ તત્પુરા પ્રોક્તં તસ્ય પિત્રા મહાધિયા ॥ ૩૧॥

સ્વયમેવ મયા પૂર્વમભિજ્ઞાતં વિશેષતઃ ।
એતદેવ હિ પૃષ્ટેન પિત્રા મે સમુદાહૃતમ્ ॥ ૩૨॥

ભવતાપ્યેષ એવાર્થઃ કથિતો વાગ્વિદાં વર ।
એષ એવ હિ વાક્યાર્થઃ શાસ્ત્રેષુ પરિદૃશ્યતે ॥ ૩૩॥

મનોવિકલ્પસંજાતં તદ્વિકલ્પપરિક્ષયાત્ ।
ક્ષીયતે દગ્ધસંસારો નિઃસાર ઇતિ નિશ્ચિતઃ ॥ ૩૪॥

તત્કિમેતન્મહાભાગ સત્યં બ્રૂહિ મમાચલમ્ ।
ત્વત્તો વિશ્રમમાપ્નોમિ ચેતસા ભ્રમતા જગત્ ॥ ૩૫॥

શ્રુણુ તાવદિદાનીં ત્વં કથ્યમાનમિદં મયા ।
શ્રીશુકં જ્ઞાનવિસ્તારં બુદ્ધિસારાન્તરાન્તરમ્ ॥ ૩૬॥

યદ્વિજ્ઞાનાત્પુમાન્સદ્યો જીવન્મુક્તત્વમાપ્નુયાત્ ॥ ૩૭॥

દૃશ્યં નાસ્તીતિ બોધેન મનસો દૃશ્યમાર્જનમ્ ।
સમ્પન્નં ચેત્તદુત્પન્ના પરા નિર્વાણનિર્વૃતિઃ ॥ ૩૮॥

અશેષેણ પરિત્યાગો વાસનાયાં ય ઉત્તમઃ ।
મોક્ષ ઇત્યુચ્યતે સદ્ભિઃ સ એવ વિમલક્રમઃ ॥ ૩૯॥

યે શુદ્ધવાસના ભૂયો ન જન્માનર્થભાગિનઃ ।
જ્ઞાતજ્ઞેયાસ્ત ઉચ્યન્તે જીવન્મુક્તા મહાધિયઃ ॥ ૪૦॥

પદાર્થભાવનાદાર્ઢ્યં બન્ધ ઇત્યભિધીયતે ।
વાસનાતાનવં બ્રહ્મન્મોક્ષ ઇત્યભિધીયતે ॥ ૪૧॥

તપઃ પ્રભૃતિના યસ્મૈ હેતુનૈવ વિના પુનઃ ।
ભોગા ઇહ ન રોચન્તે સ જીવન્મુક્ત ઉચ્યતે ॥ ૪૨॥

આપતત્સુ યથાકાલં સુખદુઃખેષ્વનારતઃ ।
ન હૃષ્યતિ ગ્લાયતિ યઃ સ જીવન્મુક્ત ઉચ્યતે ॥ ૪૩॥

હર્ષામર્ષભયક્રોધકામકાર્પણ્યદૃષ્ટિભિઃ ।
ન પરામૃશ્યતે યોઽન્તઃ સ જીવન્મુક્ત ઉચ્યતે ॥ ૪૪॥

અહંકારમયીં ત્યક્ત્વા વાસનાં લીલયૈવ યઃ ।
તિષ્ઠતિ ધ્યેયસંત્યાગી સ જીવન્મુક્ત ઉચ્યતે ॥ ૪૫॥

ઈપ્સિતાનીપ્સિતે ન સ્તો યસ્યાન્તર્વર્તિદૃષ્ટિષુ ।
સુષુપ્તિવદ્યશ્ચરતિ સ જીવન્મુક્ત ઉચ્યતે ॥ ૪૬॥

અધ્યાત્મરતિરાસીનઃ પૂર્ણઃ પાવનમાનસઃ ।
પ્રાપ્તાનુત્તમવિશ્રાન્તિર્ન કિંચિદિહ વાઞ્છતિ ।
યો જીવતિ ગતસ્નેહઃ સ જીવન્મુક્ત ઉચ્યતે ॥ ૪૭॥

સંવેદ્યેન હૃદાકાશે મનાગપિ ન લિપ્યતે ।
યસ્યાસાવજડા સંવિત્સ જીવન્મુક્ત ઉચ્યતે ॥ ૪૮॥

રાગદ્વેષૌ સુખં દુઃખં ધર્માધર્મૌ ફલાફલે ।
યઃ કરોત્યનપેક્ષ્યૈવ સ જીવન્મુક્ત ઉચ્યતે ॥ ૪૯॥

મૌનવાન્નિરહંભાવો નિર્માનો મુક્તમત્સરઃ ।
યઃ કરોતિ ગતોદ્વેગઃ સ જીવન્મુક્ત ઉચ્યતે ॥ ૫૦॥

સર્વત્ર વિગતસ્નેહો યઃ સાક્ષિવદવસ્થિતઃ ।
નિરિચ્છો વર્તતે કાર્યે સ જીવન્મુક્ત ઉચ્યતે ॥ ૫૧॥

યેન ધર્મમધર્મં ચ મનોમનનમીહિતમ્ ।
સર્વમન્તઃ પરિત્યક્તં સ જીવન્મુક્ત ઉચ્યતે ॥ ૫૨॥

યાવતી દૃશ્યકલના સકલેયં વિલોક્યતે ।
સા યેન સુષ્ઠુ સંત્યક્તા સ જીવન્મુક્ત ઉચ્યતે ॥ ૫૩॥

કટ્વમ્લલવણં તિક્તમમૃષ્ટં મૃષ્ટમેવ ચ ।
સમમેવ ચ યો ભુઙ્ક્તે સ જીવન્મુક્ત ઉચ્યતે ॥ ૫૪॥

જરામરણમાપચ્ચ રાજ્યં દારિદ્ર્યમેવ ચ ।
રમ્યમિત્યેવ યો ભુઙ્ક્તે સ જીવન્મુક્ત ઉચ્યતે ॥ ૫૫॥

ધર્માધર્મૌ સુખં દુઃખં તથા મરણજન્મની ।
ધિયા યેન સુસંત્યક્તં સ જીવન્મુક્ત ઉચ્યતે ॥ ૫૬॥

ઉદ્વેગાનન્દરહિતઃ સમયા સ્વચ્છયા ધિયા ।
ન શોચતે ન ચોદેતિ સ જીવન્મુક્ત ઉચ્યતે ॥ ૫૭॥

સર્વેચ્છાઃ સકલાઃ શઙ્કાઃ સર્વેહાઃ સર્વનિશ્ચયાઃ ।
ધિયા યેન પરિત્યક્તાઃ સ જીવન્મુક્ત ઉચ્યતે ॥ ૫૮॥

જન્મસ્થિતિવિનાશેષુ સોદયાસ્તમયેષુ ચ ।
સમમેવ મનો યસ્ય સ જીવન્મુક્ત ઉચ્યતે ॥ ૫૯॥

ન કિંચન દ્વેષ્ટિ તથા ન કિંચિદપિ કાઙ્ક્ષતિ ।
ભુઙ્ક્તે યઃ પ્રકૃતાન્ભોગાન્સ જીવન્મુક્ત ઉચ્યતે ॥ ૬૦॥

શાન્તસંસારકલનઃ કલાવાનપિ નિષ્કલઃ ।

યઃ સચિત્તોઽપિ નિશ્ચિત્તઃ સ જીવન્મુક્ત ઉચ્યતે ॥ ૬૧॥

યઃ સમસ્તાર્થજાલેષુ વ્યવહાર્યપિ નિઃસ્પૃહઃ ।
પરાર્થેષ્વિવ પૂર્ણાત્મા સ જીવન્મુક્ત ઉચ્યતે ॥ ૬૨॥

જીવન્મુક્તપદં ત્યક્ત્વા સ્વદેહે કાલસાત્કૃતે ।
વિશત્યદેહમુક્તત્વં પવનોઽસ્પન્દતામિવ ॥ ૬૩॥

વિદેહમુક્તો નોદેતિ નાસ્તમેતિ ન શામ્યતિ ।
ન સન્નાસન્ન દૂરસ્થો ન ચાહં ન ચ નેતરઃ ॥ ૬૪॥

તતઃ સ્તિમિતગંભીરં ન તેજો ન તમસ્તતમ્ ।
અનાખ્યમનભિવ્યક્તં સત્કિંચિદવશિષ્યતે ॥ ૬૫॥

ન શૂન્યં નાપિ ચાકારો ન દૃશ્યં નાપિ દર્શનમ્ ।
ન ચ ભૂતપદાર્થૌઘસદનન્તતયા સ્થિતમ્ ॥ ૬૬॥

કિમપ્યવ્યપદેશાત્મા પૂર્ણાત્પૂર્ણતરાકૃતિઃ ।
ન સન્નાસન્ન સદસન્ન ભાવો ભાવનં ન ચ ॥ ૬૭॥

ચિન્માત્રં ચૈત્યરહિતમનન્તમજરં શિવમ્ ।
અનાદિમધ્યપર્યન્તં યદનાદિ નિરામયમ્ ॥ ૬૮॥

દ્રષ્ટૃદર્શનદૃશ્યાનાં મધ્યે યદ્દર્શનં સ્મૃતમ્ ।
નાતઃ પરતરં કિંચિન્નિશ્ચયોઽસ્ત્યપરો મુને ॥ ૬૯॥

સ્વયમેવ ત્વયા જ્ઞાતં ગુરુતશ્ચ પુનઃ શ્રુતમ્ ।
સ્વસંકલ્પવશાદ્બદ્ધો નિઃસંકલ્પાદ્વિમુચ્યતે ॥ ૭૦॥

તેન સ્વયં ત્વયા જ્ઞાતં જ્ઞેયં યસ્ય મહાત્મનઃ ।
ભોગેભ્યો હ્યરતિર્જાતા દૃશ્યાદ્વા સકલાદિહ ॥ ૭૧॥

પ્રાપ્તં પ્રાપ્તવ્યમખિલં ભવતા પૂર્ણચેતસા ।
સ્વરૂપે તપસિ બ્રહ્મન્મુક્તસ્ત્વં ભ્રાન્તિમુત્સૃજ ॥ ૭૨॥

અતિબાહ્યં તથા બાહ્યમન્તરાભ્યન્તરં ધિયઃ ।
શુક પશ્યન્ન પશ્યેસ્ત્વં સાક્ષી સમ્પૂર્ણકેવલઃ ॥ ૭૩॥

વિશશ્રામ શુકસ્તૂષ્ણીં સ્વસ્થે પરમવસ્તુનિ ।
વીતશોકભયાયાસો નિરીહશ્છિન્નસંશયઃ ॥ ૭૪॥

જગામ શિખરં મેરોઃ સમાધ્યર્થમખણ્ડિતમ્ ॥ ૭૫॥

તત્ર વર્ષસહસ્રાણિ નિર્વિકલ્પસમાધિના ।
દેશે સ્થિત્વા શશામાસાવાત્મન્યસ્નેહદીપવત્ ॥ ૭૬॥

વ્યપગતકલનાકલઙ્કશુદ્ધઃ
    સ્વયમમલાત્મનિ પાવને પદેઽસૌ ।
સલિલકણ ઇવાંબુધૌ મહાત્મા
    વિગલિતવાસનમેકતાં જગામ ॥ ૭૭॥

ઇતિ મહોપનિષત્ । ઇતિ દ્વિતીયોઽધ્યાયઃ ॥ ૨॥

નિદાઘો નામ મુનિરાટ્ પ્રાપ્તવિદ્યશ્ચ બાલકઃ ।
વિહૃતસ્તીર્થયાત્રાર્થં પિત્રાનુજ્ઞાતવાન્સ્વયમ્ ॥ ૧॥

સાર્ધત્રિકોટિતીર્થેષુ સ્નાત્વા ગૃહમુપાગતઃ ।
સ્વોદન્તં કથયામાસ ઋભું નત્વા મહાયશાઃ ॥ ૨॥

સાર્ધત્રિકોટિતીર્થેષુ સ્નાનપુણ્યપ્રભાવતઃ ।
પ્રાદુર્ભૂતોમનસિ મે વિચારઃ સોઽયમીદૃશઃ ॥ ૩॥

જાયતે મ્રિયતે લોકો મ્રિયતે જનનાય ચ ।
અસ્થિરઃ સર્વ એવેમે સચરાચરચેષ્ટિતાઃ ।
સર્વાપદાં પદં પાપા ભાવા વિભવભૂમયઃ ॥ ૪॥

અયઃશલાકાસદૃશાઃ પરસ્પરમસઙ્ગિનઃ ।
શુષ્યન્તે કેવલા ભાવા મનઃકલ્પનયાનયા ॥ ૫॥

ભાવેષ્વરતિરાયાતા પથિકસ્ય મરુષ્વિવ ।
શામ્યતીદં કથં દુઃખમિતિ તપ્તોઽસ્મિ ચેતસા ॥ ૬॥

ચિન્તાનિચયચક્રાણિ નાનન્દાય ધનાનિ મે ।
સમ્પ્રસૂતકલત્રાણિ ગૃહાણ્યુગ્રાપદામિવ ॥ ૭॥

ઇયમસ્મિ સ્થિતોદારા સંસારે પરિપેલવા ।
શ્રીર્મુને પરિમોહાય સાપિ નૂનં ન શર્મદા ॥ ૮॥

આયુઃ પલ્લવકોણાગ્રલમ્બામ્બુકણભઙ્ગુરમ્ ।

ઉન્મત્ત ઇવ સંત્યજ્ય યામ્યકાણ્ડે શરીરકમ્ ॥ ૯॥

વિષયાશી વિષાસઙ્ગપરિજર્જરચેતસામ્ ।
અપ્રૌઢાત્મવિવેકાનામાયુરાયાસકારણમ્ ॥ ૧૦॥

યુજ્યતે વેષ્ટનં વાયોરાકાશસ્ય ચ ખણ્ડનમ્ ।
ગ્રન્થનં ચ તરઙ્ગાણામાસ્થા નાયુષિ યુજ્યતે ॥ ૧૧॥

પ્રાપ્યં સમ્પ્રાપ્યતે યેન ભૂયો યેન ન શોચ્યતે ।
પરાયા નિર્વૃતેઃ સ્થાનં યત્તજ્જીવિતમુચ્યતે ॥ ૧૨॥

તરવોઽપિ હિ જીવન્તિ જીવન્તિ મૃગપક્ષિણઃ ।
સ જીવતિ મનો યસ્ય મનનેનોપજીવતિ ॥ ૧૩॥

જાતાસ્ત એવ જગતિ જન્તવઃ સાધુજીવિતાઃ ।
યે પુનર્નેહ જાયન્તે શેષા જરઠગર્દભાઃ ॥ ૧૪॥

ભારો વિવેકિનઃ શાસ્ત્રં ભારો જ્ઞાનં ચ રાગિણઃ ।
અશાન્તસ્ય મનો ભારો ભારોઽનાત્મવિદો વપુઃ ॥ ૧૫॥

અહંકારવશાદાપદહંકારાદ્દુરાધયઃ ।
અહંકારવશાદીહા નાહંકારાત્પરો રિપુઃ ॥ ૧૬॥

અહંકારવશાદ્યદ્યન્મયા ભુક્તં ચરાચરમ્ ।
તત્તત્સર્વમવસ્ત્વેવ વસ્ત્વહંકારરિક્તતા ॥ ૧૭॥

ઇતશ્ચેતશ્ચ સુવ્યગ્રં વ્યર્થમેવાભિધાવતિ ।
મનો દૂરતરં યાતિ ગ્રામે કૌલેયકો યથા ॥ ૧૮॥

ક્રૂરેણ જડતાં યાતા તૃષ્ણાભાર્યાનુગામિના ।
વશઃ કૌલેયકેનેવ બ્રહ્મન્મુક્તોઽસ્મિ ચેતસા ॥ ૧૯॥

અપ્યબ્ધિપાનાન્મહતઃ સુમેરૂન્મૂલનાદપિ ।
અપિ વહ્ન્યશનાદ્બ્રહ્મન્વિષમશ્ચિત્તનિગ્રહઃ ॥ ૨૦॥

ચિત્તં કારણમર્થાનાં તસ્મિન્સતિ જગત્ત્રયમ્ ।
તસ્મિન્ક્ષીણે જગત્ક્ષીણં તચ્ચિકિત્સ્યં પ્રયત્નતઃ ॥ ૨૧॥

યાં યામહં મુનિશ્રેષ્ઠ સંશ્રયામિ ગુણશ્રિયમ્ ।
તાં તાં કૃન્તતિ મે તૃષ્ણા તન્ત્રીમિવ કુમૂષિકા ॥ ૨૨॥

પદં કરોત્યલઙ્ઘ્યેઽપિ તૃપ્તા વિફલમીહતે ।
ચિરં તિષ્ઠતિ નૈકત્ર તૃષ્ણા ચપલમર્કટી ॥ ૨૩॥

ક્ષણમાયાતિ પાતાલં ક્ષણં યાતિ નભસ્થલમ્ ।
ક્ષણં ભ્રમતિ દિક્કુઞ્જે તૃષ્ણા હૃત્પદ્મષટ્પદી ॥ ૨૪॥

સર્વસંસારદુઃખાનાં તૃષ્ણૈકા દીર્ઘદુઃખદા ।
અન્તઃપુરસ્થમપિ યા યોજયત્યતિસંકટે ॥ ૨૫॥

તૃષ્ણાવિષૂચિકામન્ત્રશ્ચિન્તાત્યાગો હિ સ દ્વિજ ।
સ્તોકેનાનન્દમાયાતિ સ્તોકેનાયાતિ ખેદતામ્ ॥ ૨૬॥

નાસ્તિ દેહસમઃ શોચ્યો નીચો ગુણવિવર્જિતઃ ॥ ૨૭॥

કલેવરમહંકારગૃહસ્થસ્ય મહાગૃહમ્ ।
લુઠત્વભ્યેતુ વા સ્થૈર્યં કિમનેન ગુરો મમ ॥ ૨૮॥

પઙ્ક્તિબદ્ધેન્દ્રિયપશું વલ્ગત્તૃષ્ણાગૃહાઙ્ગણમ્ ।
ચિત્તભૃત્યજનાકીર્ણં નેષ્ટં દેહગૃહં મમ ॥ ૨૯॥

જિહ્વામર્કટિકાક્રાન્તવદનદ્વારભીષણમ્ ।
દૃષ્ટદન્તાસ્થિશકલં નેષ્ટં દેહગૃહં મમ ॥ ૩૦॥

રક્તમાંસમયસ્યાસ્ય સબાહ્યાભ્યન્તરે મુને ।
નાશૈકધર્મિણો બ્રૂહિ કૈવ કાયસ્ય રમ્યતા ॥ ૩૧॥

તડિત્સુ શરદભ્રેષુ ગન્ધર્વનગરેષુ ચ ।
સ્થૈર્યં યેન વિનિર્ણીતં સ વિશ્વસિતુ વિગ્રહે ॥ ૩૨॥

શૈશવે ગુરુતો ભીતિર્માતૃતઃ પિતૃતસ્તથા ।
જનતો જ્યેષ્ઠબાલાચ્ચ શૈશવં ભયમન્દિરમ્ ॥ ૩૩॥

સ્વચિત્તબિલસંસ્થેન નાનાવિભ્રમકારિણા ।
બલાત્કામપિશાચેન વિવશઃ પરિભૂયતે ॥ ૩૪॥

દાસાઃ પુત્રાઃ સ્ત્રિયશ્ચૈવ બાન્ધવાઃ સુહૃદસ્તથા ।
હસન્ત્યુન્મત્તકમિવ નરં વાર્ધકકમ્પિતમ્ ॥ ૩૫॥

દૈન્યદોષમયી દીર્ઘા વર્ધતે વાર્ધકે સ્પૃહા ।

સર્વાપદામેકસખી હૃદિ દાહપ્રદાયિની ॥ ૩૬॥

ક્વચિદ્વા વિદ્યતે યૈષા સંસારે સુખભાવના ।
આયુઃ સ્તમ્બમિવાસાદ્ય કાલસ્તામપિ કૃન્તતિ ॥ ૩૭॥

તૃણં પાંસું મહેન્દ્રં ચ સુવર્ણં મેરુસર્ષપમ્ ।
આત્મંભરિતયા સર્વમાત્મસાત્કર્તુમુદ્યતઃ ।
કાલોઽયં સર્વસંહારી તેનાક્રાન્તં જગત્ત્રયમ્ ॥ ૩૮॥

માંસપાઞ્ચાલિકાયાસ્તુ યન્ત્રલોલેઽઙ્ગપઞ્જરે ।
સ્નાય્વસ્થિગ્રન્થિશાલિન્યાઃ સ્ત્રિયઃ કિમિવ શોભનમ્ ॥ ૩૯॥

ત્વઙ્માંસરક્તબાષ્પામ્બુ પૃથક્કૃત્વા વિલોચને ।
સમાલોકય રમ્યં ચેત્કિં મુધા પરિમુહ્યસિ ॥ ૪૦॥

મેરુશૃઙ્ગતટોલ્લાસિગઙ્ગાચલરયોપમા ।
દૃષ્ટા યસ્મિન્મુને મુક્તાહારસ્યોલ્લાસશાલિતા ॥ ૪૧॥

શ્મશાનેષુ દિગન્તેષુ સ એવ લલનાસ્તનઃ ।
શ્વભિરાસ્વાદ્યતે કાલે લઘુપિણ્ડ ઇવાન્ધસઃ ॥ ૪૨॥

કેશકજ્જલધારિણ્યો દુઃસ્પર્શા લોચનપ્રિયાઃ ।
દુષ્કૃતાગ્નિશિખા નાર્યો દહન્તિ તૃણવન્નરમ્ ॥ ૪૩॥

જ્વલતામતિદૂરેઽપિ સરસા અપિ નીરસાઃ ।
સ્ત્રિયો હિ નરકાગ્નીનામિન્ધનં ચારુ દારુણમ્ ॥ ૪૪॥

કામનામ્ના કિરાતેન વિકીર્ણા મુગ્ધચેતસઃ ।
નાર્યો નરવિહઙ્ગાનામઙ્ગબન્ધનવાગુરાઃ ॥ ૪૫॥

જન્મપલ્વલમત્સ્યાનાં ચિત્તકર્દમચારિણામ્ ।
પુંસાં દુર્વાસનારજ્જુર્નારી બડિશપિણ્ડિકા ॥ ૪૬॥

સર્વેષાં દોષરત્નાનાં સુસમુદ્ગિકયાનયા ।
દુઃખશૃઙ્ખલયા નિત્યમલમસ્તુ મમ સ્ત્રિયા ॥ ૪૭॥

યસ્ય સ્ત્રી તસ્ય ભોગેચ્છા નિઃસ્ત્રીકસ્ય ક્વ ભોગભૂઃ ।
સ્ત્રિયં ત્યક્ત્વા જગત્ત્યક્તં જગત્ત્યક્ત્વા સુખી ભવેત્ ॥ ૪૮॥

દિશોઽપિ ન હિ દૃશ્યન્તે દેશોઽપ્યન્યોપદેશકૃત્ ।

શૈલા અપિ વિશીર્યન્તે શીર્યન્તે તારકા અપિ ॥ ૪૯॥

શુષ્યન્ત્યપિ સમુદ્રાશ્ચ ધ્રુવોઽપ્યધ્રુવજીવનઃ ।
સિદ્ધા અપિ વિનશ્યન્તિ જીર્યન્તે દાનવાદયઃ ॥ ૫૦॥

પરમેષ્ઠ્યપિ નિષ્ઠાવાન્હીયતે હરિરપ્યજઃ ।
ભાવોઽપ્યભાવમાયાતિ જીર્યન્તે વૈ દિગીશ્વરાઃ ॥ ૫૧॥

બ્રહ્મા વિષ્ણુશ્ચ રુદ્રશ્ચ સર્વા વા ભૂતજાતયઃ ।
નાશમેવાનુધાવન્તિ સલિલાનીવ વાડવમ્ ॥ ૫૨॥

આપદઃ ક્ષણમાયાન્તિ ક્ષણમાયાન્તિ સમ્પદઃ ।
ક્ષણં જન્માથ મરણં સર્વં નશ્વરમેવ તત્ ॥ ૫૩॥

અશૂરેણ હતાઃ શૂરા એકેનાપિ શતં હતમ્ ।
વિષં વિષયવૈષમ્યં ન વિષં વિષમુચ્યતે ॥ ૫૪॥

જન્માન્તરઘ્ના વિષયા એકજન્મહરં વિષમ્ ।
ઇતિ મે દોષદાવાગ્નિદગ્ધે સમ્પ્રતિ ચેતસિ ॥ ૫૫॥

સ્ફુરન્તિ હિ ન ભોગાશા મૃગતૃષ્ણાસરઃસ્વપિ ।
અતો માં બોધયાશુ ત્વં તત્ત્વજ્ઞાનેન વૈ ગુરો ॥ ૫૬॥

નો ચેન્મૌનં સમાસ્થાય નિર્માનો ગતમત્સરઃ ।
ભાવયન્મનસા વિષ્ણું લિપિકર્માર્પિતોપમઃ ॥ ૫૭॥

ઇતિ મહોપનિષત્ । ઇતિ તૃતીયોઽધ્યાયઃ ॥ ૩॥

નિદાઘ તવ નાસ્તન્યજ્જ્ઞેયં જ્ઞાનવતાં વર ।
પ્રજ્ઞયા ત્વં વિજાનાસિ ઈશ્વરાનુગૃહીતયા ।
ચિત્તમાલિન્યસંજાતં માર્જયામિ ભ્રમં મુને ॥ ૧॥

મોક્ષદ્વારે દ્વારપાલશ્ચત્વારઃ પરિકીર્તિતાઃ ।
શમો વિચારઃ સન્તોષશ્ચતુર્થઃ સાધુસઙ્ગમઃ ॥ ૨॥

એકં વા સર્વયત્નેન સર્વમુત્સૃજ્ય સંશ્રયેત્ ।
એકસ્મિન્વશગે યાન્તિ ચત્વારોઽપિ વશં ગતાઃ ॥ ૩॥

શાસ્ત્રૈઃ સજ્જનસમ્પર્કપૂર્વકૈશ્ચ તપોદમૈઃ ।
આદૌ સંસારમુક્ત્યર્થં પ્રજ્ઞામેવાભિવર્ધયેત્ ॥ ૪॥

સ્વાનુભૂતેશ્ચ શાસ્ત્રસ્ય ગુરોશ્ચેવૈકવાક્યતા ।
યસ્યાભ્યાસેન તેનાત્મ સતતં ચાવલોક્યતે ॥ ૫॥

સંકલ્પાશાનુસન્ધાનવર્જનં ચેત્પ્રતિક્ષણમ્ ।
કરોષિ તદચિત્તત્વં પ્રાપ્ત એવાસિ પાવનમ્ ॥ ૬॥

ચેતસો યદકર્તૃત્વં તત્સમાધાનમીરિતમ્ ।
તદેવ કેવલીભાવં સાશુભા નિર્વૃતિઃ પરા ॥ ૭॥

ચેતસા સમ્પરિત્યજ્ય સર્વભાવાત્મભાવનામ્ ।
યથા તિષ્ઠસિ તિષ્ઠ ત્વં મૂકાન્ધબધિરોપમઃ ॥ ૮॥

સર્વં પ્રશાન્તમજમેકમનાદિમધ્ય-
માભાસ્વરં સ્વદનમાત્રમચૈત્યચિહ્નમ્ ।
સર્વં પ્રશાન્તમિતિ શબ્દમયી ચ દૃષ્ટિ-
ર્બાધાર્થમેવ હિ મુધૈવ તદોમિતીદમ્ ॥ ૧૦॥

નિત્યપ્રબુદ્ધચિત્તસ્ત્વં કુર્વન્વાપિ જગત્ક્રિયામ્ ।
આત્મૈકત્વં વિદિત્વા ત્વં તિષ્ઠાક્ષુબ્ધમહાબ્ધિવત્ ॥ ૧૧॥

તત્ત્વાવબોધ એવાસૌ વાસનાતૃણપાવકઃ ।
પ્રોક્તઃ સમાધિશબ્દેન નતુ તૂષ્ણીમવસ્થિતિઃ ॥ ૧૨॥

નિરિચ્છે સંસ્થિતે રત્ને યથા લોકઃ પ્રવર્તતે ।
સત્તામાત્રે પરે તત્ત્વે તથૈવાયં જગદ્ગણઃ ॥ ૧૩॥

અતશ્ચાત્મનિ કર્તૃત્વમકર્તૃત્વં ચ વૈ મુને ।
નિરિચ્છત્વાદકર્તાસૌ કર્તા સંનિધિમાત્રતઃ ॥ ૧૪॥

તે દ્વે બ્રહ્મણિ વિન્દેતિ કર્તૃતાકર્તૃતે મુને ।
યત્રૈવૈષ ચમત્કારસ્તમાશ્રિત્ય સ્થિરો ભવ ॥ ૧૫॥

તસ્માન્નિત્યમકર્તાહમિતિ ભાવનયેદ્ધયા ।
પરમામૃતનામ્ની સા સમતૈવાવશિષ્યતે ॥ ૧૬॥

નિદાઘ શૃણુ સત્ત્વસ્થા જાતા ભુવિ મહાગુણાઃ ।
તે નિત્યમેવાભ્યુદિતા મુદિતાઃ સ્વ ઇવેન્દવઃ ॥ ૧૭॥

નાપદિ ગ્લાનિમાયાન્તિ નિશિ હેમામ્બુજં યથા ।
નેહન્તે પ્રકૃતાદન્યદ્રમન્તે શિષ્ટવર્ત્મનિ ॥ ૧૮॥

આકૃત્યૈવ વિરાજન્તે મૈત્ર્યાદિગુણવૃત્તિભિઃ ।
સમાઃ સમરસાઃ સૌમ્ય સતતં સાધુવૃત્તયઃ ॥ ૧૯॥

અબ્ધિવદ્ધૃતમર્યાદ ભવતિ વિશદાશયાઃ ।
નિયતિં ન વિમુઞ્ચન્તિ મહાન્તો ભાસ્કરા ઇવ ॥ ૨૦॥

કોઽહં કથમિદં ચેતિ સંસારમલમાતતમ્ ।
પ્રવિચાર્યં પ્રયત્નેન પ્રાજ્ઞેન સહસાધુના ॥ ૨૧॥

નાકર્મસુ નિયોક્તવ્યં નાનાર્યેણ સહાવસેત્ ।
દ્રષ્ટવ્યઃ સર્વસંહર્તા ન મૃત્યુરવહેલયા ॥ ૨૨॥

શરીરમસ્થિમાંસં ચ ત્યક્ત્વા રક્તાદ્યશોભનમ્ ।
ભૂતમુક્તાવલીતન્તું ચિન્માત્રમવલોકયેત્ ॥ ૨૩॥

ઉપાદેયાનુપતનં હેયૈકાન્તવિસર્જનમ્ ।
યદેતન્મનસો રૂપં તદ્બાહ્યં વિદ્ધિ નેતરત્ ॥ ૨૪॥

ગુરુશાસ્ત્રોક્તમાર્ગેણ સ્વાનુભૂત્યા ચ ચિદ્ઘને ।
બ્રહ્મૈવાહમિતિ જ્ઞાત્વા વીતશોકો ભવેન્મુનિઃ ॥ ૨૫॥

યત્ર નિશિતાસિશતપાતનમુત્પલતાડનવત્સોઢવ્યમગ્નિના
દાહો હિમસેચનમિવાઙ્ગારવર્તનં ચન્દનચર્ચેવ
નિરવધિનારાચવિકિરપાતો નિદાઘવિનોદનધારા-
ગૃહશીકરવર્ષણમિવ સ્વશિરચ્છેદઃ સુખનિદ્રેવ
મૂકીકરણમાનનમુદ્રેવ બાધિર્યં મહાનુપચય ઇવેદં
નાવહેલનયા ભવિતવ્યમેવં દૃઢવૈરાગ્યાદ્બોધો ભવતિ ॥

ગુરુવાક્યસમુદ્ભૂતસ્વાનુભૂત્યાદિશુદ્ધયા ।
યસ્યાભ્યાસેન તેનાત્મા સતતં ચાવલોક્યતે ॥ ૨૬॥

વિનષ્ટદિગ્ભ્રમસ્યાપિ યથાપૂર્વં વિભાતિ દિક્ ।
તથા વિજ્ઞાનવિધ્વસ્તં જગન્નાસ્તીતિ ભાવય ॥ ૨૭॥

ન ધનાન્યુપકુર્વન્તિ ન મિત્રાણિ ન બાન્ધવાઃ ।

ન કાયક્લેશવૈધુર્યં ન તીર્થાયતનાશ્રયઃ ।
કેવલં તન્મનોમાત્રમયેનાસાદ્યતે પદમ્ ॥ ૨૮॥

યાનિ દુઃખાનિ યા તૃષ્ણા દુઃસહા યે દુરાધયઃ ।
શાન્તચેતઃસુ તત્સર્વં તમોઽર્કેષ્વિવ નશ્યતિ ॥ ૨૯॥

માતરીવ પરં યાન્તિ વિષમાણિ મૃદૂનિ ચ ।
વિશ્વાસમિહ ભૂતાનિ સર્વાણિ શમશાલિનિ ॥ ૩૦॥

ન રસાયનપાનેન ન લક્ષ્મ્યાલિઙ્ગિતેન ચ ।
ન તથા સુખમાપ્નોતિ શમેનાન્તર્યથા જનઃ ॥ ૩૧॥

શ્રુત્વા સ્પૃષ્ટ્વા ચ ભુક્ત્વા ચ દૃષ્ટ્વા જ્ઞાત્વા શુભાશુભમ્ ।
ન હૃષ્યતિ ગ્લાયતિ યઃ સ શાન્ત ઇતિ કથ્યતે ॥ ૩૨॥

તુષારકરબિંબાચ્છં મનો યસ્ય નિરાકુલમ્ ।
મરણોત્સવયુદ્ધેષુ સ શાન્ત ઇતિ કથ્યતે ॥ ૩૩॥

તપસ્વિષુ બહુજ્ઞેષુ યાજકેષુ નૃપેષુ ચ ।
બલવત્સુ ગુણાઢ્યેષુ શમવાનેવ રાજતે ॥ ૩૪॥

સન્તોષામૃતપાનેન યે શાન્તાસ્તૃપ્તિમાગતાઃ ।
આત્મારામા મહાત્માનસ્તે મહાપદમાગતાઃ ॥ ૩૫॥

અપ્રાપ્તં હિ પરિત્યજ્ય સમ્પ્રાપ્તે સમતાં ગતઃ ।
અદૃષ્ટખેદાખેદો યઃ સન્તુષ્ટ ઇતિ કથ્યતે ॥ ૩૬॥

નાભિનન્દત્યસમ્પ્રાપ્તં પ્રાપ્તં ભુઙ્ક્તે યથેપ્સિતમ્ ।
યઃ સ સૌમ્યસમાચારઃ સન્તુષ્ટ ઇતિ કથ્યતે ॥ ૩૭॥

રમતે ધીર્યતાપ્રાપ્તે સાધ્વીવાઽન્તઃપુરાજિરે ।
સા જીવન્મુક્તતોદેતિ સ્વરૂપાનન્દદાયિની ॥ ૩૮॥

યથાક્ષણં યથાશાસ્ત્રં યથાદેશં યથાસુખમ્ ।
યથાસંભવસત્સઙ્ગમિમં મોક્ષપથક્રમમ્ ।
તાવદ્વિચારયેત્પ્રાજ્ઞો યાવદ્વિશ્રાન્તિમાત્મનિ ॥ ૩૯॥

તુર્યવિશ્રાન્તિયુક્તસ્ય નિવૃત્તસ્ય ભવાર્ણવાત્ ।
જીવતોઽજીવતશ્ચૈવ ગૃહસ્થસ્યાથવા યતેઃ ॥ ૪૦॥

નાકૃતેન કૃતેનાર્થો ન શ્રુતિસ્મૃતિવિભ્રમૈઃ ।
નિર્મન્દર ઇવામ્બોધિઃ સ તિષ્ઠતિ યથાસ્થિતઃ ॥ ૪૧॥

સર્વાત્મવેદનં શુદ્ધં યદોદેતિ તવાત્મકમ્ ।
ભાતિ પ્રસૃતિદિક્કાલબાહ્યં ચિદ્રૂપદેહકમ્ ॥ ૪૨॥

એવમાત્મા યથા યત્ર સમુલ્લાસમુપાગતઃ ।
તિષ્ઠત્યાશુ તથા તત્ર તદ્રૂપશ્ચ વિરાજતે ॥ ૪૩॥

યદિદં દૃશ્યતે સર્વં જગત્સ્થાવરજઙ્ગમમ્ ।
તત્સુષુપ્તાવિવ સ્વપ્નઃ કલ્પાન્તે પ્રવિનશ્યતિ ॥ ૪૪॥

ઋતમાત્મા પરંબ્રહ્મ સત્યમિત્યાદિકા બુધૈઃ ।
કલ્પિતા વ્યવહારાર્થં યસ્ય સંજ્ઞા મહાત્મનઃ ॥ ૪૫॥

યથા કટકશબ્દાર્થઃ પૃથગ્ભાવો ન કાઞ્ચનાત્ ।
ન હેમકટકાત્તદ્વજ્જગચ્છબ્દાર્થતા પરા ॥ ૪૬॥

તેનેયમિન્દ્રજાલશ્રીર્જગતિ પ્રવિતન્યતે ।
દ્રષ્ટુદૃશ્યસ્ય સત્તાન્તર્બન્ધ ઇત્યભિધીયતે ॥ ૪૭॥

દ્રષ્ટા દૃશ્યવશાદ્બદ્ધો દૃશ્યાભાવે વિમુચ્યતે ।
જગત્ત્વમહમિત્યાદિસર્ગાત્મા દૃશ્યમુચ્યતે ॥ ૪૮॥

મનસૈવેન્દ્રજાલશ્રીર્જગતિ પ્રવિતન્યતે ।
યાવદેતત્સંભવતિ તાવન્મોક્ષો ન વિદ્યતે ॥ ૪૯॥

બ્રહ્મણા તન્યતે વિશ્વં મનસૈવ સ્વયંભુવા ।
મનોમયમતો વિશ્વં યન્નામ પરિદૃશ્યતે ॥ ૫૦॥

ન બાહ્યે નાપિ હૃદયે સદ્રૂપં વિદ્યતે મનઃ ।
યદર્થં પ્રતિભાનં તન્મન ઇત્યભિધીયતે ॥ ૫૧॥

સંકલ્પનં મનો વિદ્ધિ સંકલ્પસ્તત્ર વિદ્યતે ।
યત્ર સંકલ્પનં તત્ર મનોઽસ્તીત્યવગમ્યતામ્ ॥ ૫૨॥

સંકલ્પમનસી ભિન્ને ન કદાચન કેનચિત્ ।
સંકલ્પજાતે ગલિતે સ્વરૂપમવશિષ્યતે ॥ ૫૩॥

અહં ત્વં જગતિત્યાદૌ પ્રશાન્તે દૃશ્યસંભ્રમે ।

સ્યાત્તાદૃશી કેવલતા દૃશ્યે સત્તામુપાગતે ॥ ૫૪॥

મહાપ્રલયસમ્પત્તૌ હ્યસત્તાં સમુપાગતે ।
અશેષદૃશ્યે સર્ગાદૌ શાન્તમેવાવશિષ્યતે ॥ ૫૫॥

અસ્ત્યનસ્તમિતો ભાસ્વાનજો દેવો નિરામયઃ ।
સર્વદા સર્વકૃત્સર્વઃ પરમાત્મેત્યુદાહૃતઃ ॥ ૫૬॥

યતો વાચો નિવર્તન્તે યો મુક્તૈરવગમ્યતે ।
યસ્ય ચાત્માદિકાઃ સંજ્ઞાઃ કલ્પિતા ન સ્વભાવતઃ ॥ ૫૭॥

ચિત્તાકાશં ચિદાકાશમાકાશં ચ તૃતીયકમ્ ।
દ્વાભ્યાં શૂન્યતરં વિદ્ધિ ચિદાકાશં મહામુને ॥ ૫૮॥

દેશાદ્દેશાન્તરપ્રાપ્તૌ સંવિદો મધ્યમેવ યત્ ।
નિમેષેણ ચિદાકાશં તદ્વિદ્ધિ મુનિપુઙ્ગવ ॥ ૫૯॥

તસ્મિન્નિરસ્તનિઃશેષસંકલ્પસ્થિતિમેષિ ચેત્ ।
સર્વાત્મકં પદં શાન્તં તદા પ્રાપ્નોષ્યસંશયઃ ॥ ૬૦॥

ઉદિતૌદાર્યસૌન્દર્યવૈરાગ્યરસગર્ભિણી ।
આનન્દસ્યન્દિની યૈષા સમાધિરભિધીયતે ॥ ૬૧॥

દૃશ્યાસંભવબોધેન રાગદ્વેષાદિતાનવે ।
રતિર્બલોદિતા યાસૌ સમાધિરભિધીયતે ॥ ૬૨॥

દૃશ્યાસંભવબોધો હિ જ્ઞાનં જ્ઞેયં ચિદાત્મકમ્ ।
તદેવ કેવલીભાવં તતોઽન્યત્સકલં મૃષા ॥ ૬૩॥

મત્ત ઐરાવતો બદ્ધઃ સર્ષપીકોણકોટરે ।
મશકેન કૃતં યુદ્ધં સિંહૌઘૈરેણુકોટરે ॥ ૬૪॥

પદ્માક્ષે સ્થાપિતો મેરુર્નિગીર્ણો ભૃઙ્ગસૂનુના ।
નિદાઘ વિદ્ધિ તાદૃક્ત્વં જગતેતદ્ભ્રમાત્મકમ્ ॥ ૬૫॥

ચિત્તમેવ હિ સંસારો રોગાદિક્લેશદૂષિતમ્ ।
તદેવ તૈર્વિનિર્મુક્તં ભવાન્ત ઇતિ કથ્યતે ॥ ૬૬॥

મનસા ભાવ્યમાનો હિ દેહતાં યાતિ દેહકઃ ।
દેહવાસનયા મુક્તો દેહધર્મૈર્ન લિપ્યતે ॥ ૬૭॥

કલ્પં ક્ષણીકરોત્યન્તઃ ક્ષણં નયતિ કલ્પતામ્ ।
મનોવિલાસસંસાર ઇતિ મે નિશ્ચિતા મતિઃ ॥ ૬૮॥

નાવિરતો દુશ્ચરિતાન્નાશાન્તો નાસમાહિતઃ ।
નાશાન્તમનસો વાપિ પ્રજ્ઞાનેનૈનમાપ્નુયાત્ ॥ ૬૯॥

તદ્બ્રહ્માનન્દમદ્વન્દ્વં નિર્ગુણં સત્યચિદ્ઘનમ્ ।
વિદિત્વા સ્વાત્મનો રૂપં ન બિભેતિ કદાચન ॥ ૭૦॥

પરાત્પરં યન્મહતો મહાન્તં
    સ્વરૂપતેજોમયશાશ્વતં શિવમ્ ।
કવિં પુરાણં પુરુષં સનાતનં
    સર્વેશ્વરં સર્વદેવૈરુપાસ્યમ્ ॥ ૭૧॥

અહં બ્રહ્મેતિ નિયતં મોક્ષહેતુર્મહાત્મનામ્ ।
દ્વે પદે બન્ધમોક્ષાય નિર્મમેતિ મમેતિ ચ ।
મમેતિ બધ્યતે જન્તુર્નિર્મમેતિ વિમુચ્યતે ॥ ૭૨॥

જીવેશ્વરાદિરૂપેણ ચેતનાચેતનાત્મકમ્ ।
ઈક્ષણાદિપ્રવેશાન્તા સૃષ્ટિરીશેન કલ્પિતા ।
જાગ્રદાદિવિમોક્ષાન્તઃ સંસારો જીવકલ્પિતઃ ॥ ૭૩॥

ત્રિણાચિકાદિયોગાન્તા ઈશ્વરભ્રાન્તિમાશ્રિતાઃ ।
લોકાયતાદિસાંખ્યાન્તા જીવવિભ્રાન્તિમાશ્રિતાઃ ॥ ૭૪॥

તસ્માન્મુમુક્ષિભિર્નૈવ મતિર્જીવેશવાદયોઃ ।
કાર્યા કિંતુ બ્રહ્મતત્ત્વં નિશ્ચલેન વિચાર્યતામ્ ॥ ૭૫॥

અવિશેષેણ સર્વં તુ યઃ પશ્યતિ ચિદન્વયાત્ ।
સ એવ સાક્ષાદ્વિજ્ઞાની સ શિવઃ સ હરિર્વિધિઃ ॥ ૭૬॥

દુર્લભો વિષયત્યાગો દુર્લભં તત્ત્વદર્શનમ્ ।
દુર્લભા સહજાવસ્થા સદ્ગુરોઃ કરુણાં વિના ॥ ૭૭॥

ઉત્પન્નશક્તિર્બોધસ્ય ત્યક્તનિઃશેષકર્મણઃ ।
યોગિનઃ સહજાવસ્થા સ્વયમેવોપજાયતે ॥ ૭૮॥

યદા હ્યેવૈષ એતસ્મિન્નલ્પમપ્યન્તરં નરઃ ।
વિજાનાતિ તદા તસ્ય ભયં સ્યાન્નાત્ર સંશયઃ ॥ ૭૯॥

સર્વગં સચ્ચિદાનન્દં જ્ઞાનચક્ષુર્નિરીક્ષતે ।
અજ્ઞાનચક્ષુર્નેક્ષેત ભાસ્વન્તં ભાનુમન્ધવત્ ॥ ૮૦॥

પ્રજ્ઞાનમેવ તદ્બ્રહ્મ સત્યપ્રજ્ઞાનલક્ષણમ્ ।
એવં બ્રહ્મપરિજ્ઞાનાદેવ મર્ત્યોઽમૃતો ભવેત્ ॥ ૮૧॥

ભિદ્યતે હૃદયગ્રન્થિશ્છિદ્યન્તે સર્વસંશયાઃ ।
ક્ષીયન્તે ચાસ્ય કર્માણિ તસ્મિન્દૃષ્ટે પરાવરે ॥ ૮૨॥

અનાત્મતાં પરિત્યજ્ય નિર્વિકારો જગત્સ્થિતૌ ।
એકનિષ્ઠતયાન્તસ્થઃ સંવિન્માત્રપરો ભવ ॥ ૮૩॥

મરુભૂમૌ જલં સર્વં મરુભૂમાત્રમેવ તત્ ।
જગત્ત્રયમિદં સર્વં ચિન્માત્રં સ્વવિચારતઃ ॥ ૮૪॥

લક્ષ્યાલક્ષ્યમતિં ત્યક્ત્વા યસ્તિષ્ઠેત્કેવલાત્મના ।
શિવ એવ સ્વયં સાક્ષાદયં બ્રહ્મવિદુત્તમઃ ॥ ૮૫॥

અધિષ્ઠાનમનૌપમ્યમવાઙ્મનસગોચરમ્ ।
નિત્યં વિભું સર્વગતં સુસૂક્ષ્મં ચ તદવ્યયમ્ ॥ ૮૬॥

સર્વશક્તેર્મહેશસ્ય વિલાસો હિ મનો જગત્ ।
સંયમાસંયમાભ્યાં ચ સંસારં શાન્તિમન્વગાત્ ॥ ૮૭॥

મનોવ્યાધેશ્ચિકિત્સાર્થમુપાયં કથયામિ તે ।
યદ્યત્સ્વાભિમતં વસ્તુ તત્ત્યજન્મોક્ષમશ્નુતે ॥ ૮૮॥

સ્વાયત્તમેકાન્તહિતં સ્વેપ્સિતત્યાગવેદનમ્ ।
યસ્ય દુષ્કરતાં યાતં ધિક્તં પુરુષકીટકમ્ ॥ ૮૯॥

સ્વપૌરુષૈકસાધ્યેન સ્વેપ્સિતત્યાગરૂપિણા ।
મનઃપ્રશમમાત્રેણ વિના નાસ્તિ શુભા ગતિઃ ॥ ૯૦॥

અસંકલ્પનશસ્ત્રેણ છિન્નં ચિત્તમિદં યદા ।
સર્વં સર્વગતં શાન્તં બ્રહ્મ સમ્પદ્યતે તદા ॥ ૯૧॥

ભવ ભાવનયા મુક્તો મુક્તઃ પરમયા ધિયા ।

ધારયાત્માનમવ્યગ્રો ગ્રસ્તચિત્તં ચિતઃ પદમ્ ॥ ૯૨॥

પરં પૌરુષમાશ્રિત્ય નીત્વા ચિત્તમચિત્તતામ્ ।
ધ્યાનતો હૃદયાકાશે ચિતિ ચિચ્ચક્રધારયા ॥ ૯૩॥

મનો મારય નિઃશઙ્કં ત્વાં પ્રબધ્નન્તિ નારયઃ ॥ ૯૪॥

અયં સોઽહમિદં તન્મ એતાવન્માત્રકં મનઃ ।
તદભાવનમાત્રેણ દાત્રેણેવ વિલીયતે ॥ ૯૫॥

છિન્નાભ્રમણ્ડલં વ્યોમ્નિ યથા શરદિ ધૂયતે ।
વાતેન કલ્પકેનૈવ તથાન્તર્ધૂયતે મનઃ ॥ ૯૬॥

કલ્પાન્તપવના વાન્તુ યાન્તુ ચૈકત્વમર્ણવાઃ ।
તપન્તુ દ્વાદશાદિત્યા નાસ્તિ નિર્મનસઃ ક્ષતિઃ ॥ ૯૭॥

અસંકલ્પનમાત્રૈકસાધ્યે સકલસિદ્ધિદે ।
અસંકલ્પાતિસામ્રાજ્યે તિષ્ઠવષ્ટબ્ધતત્પદઃ ॥ ૯૮॥

ન હિ ચઞ્ચલતાહીનં મનઃ ક્વચન દૃશ્યતે ।
ચઞ્ચલત્વં મનોધર્મો વહ્નેર્ધર્મો યથોષ્ણતા ॥ ૯૯॥

એષા હિ ચઞ્ચલાસ્પન્દશક્તિશ્ચિત્તત્વસંસ્થિતા ।
તાં વિદ્ધિ માનસીં શક્તિં જગદાડંબરાત્મિકામ્ ॥ ૧૦૦॥

યત્તુ ચઞ્ચલતાહીનં તન્મનોઽમૃતમુચ્યતે ।
તદેવ ચ તપઃ શાસ્ત્રસિદ્ધાન્તે મોક્ષ ઉચ્યતે ॥ ૧૦૧॥

તસ્ય ચઞ્ચલતા યૈષા ત્વવિદ્યા વાસનાત્મિકા ।
વાસનાપરનામ્નીં તાં વિચારેણ વિનાશય ॥ ૧૦૨॥

પૌરુષેણ પ્રયત્નેન યસ્મિન્નૈવ પદે મનઃ ।
યોજ્યતે તત્પદં પ્રાપ્ય નિર્વિકલ્પો ભવાનઘ ॥ ૧૦૩॥

અતઃ પૌરુષમાશ્રિત્ય ચિત્તમાક્રમ્ય ચેતસા ।
વિશોકં પદમાલમ્બ્ય નિરાતઙ્કઃ સ્થિરો ભવ ॥ ૧૦૪॥

મન એવ સમર્થં હિ મનસો દૃઢનિગ્રહે ।
અરાજકઃ સમર્થઃ સ્યાદ્રાજ્ઞો નિગ્રહકર્મણિ ॥ ૧૦૫॥

તૃષ્ણાગ્રાહગૃહીતાનાં સંસારાર્ણવપાતિનામ્ ।
આવર્તૈરુહ્યમાનાનાં દૂરં સ્વમન એવ નૌઃ ॥ ૧૦૬॥

મનસૈવ મનશ્છિત્ત્વા પાશં પરમબન્ધનમ્ ।
ભવાદુત્તારયાત્માનં નાસાવન્યેન તાર્યતે ॥ ૧૦૭॥

યા યોદેતિ મનોનામ્ની વાસના વાસિતાન્તરા ।
તાં તાં પરિહરેત્પ્રાજ્ઞસ્તતોऽવિદ્યાક્ષયો ભવેત્ ॥ ૧૦૮॥

ભોગૈકવાસનાં ત્યક્ત્વા ત્યજ ત્વં ભેદવાસનામ્ ।
ભાવાભાવૌ તતસ્ત્યક્ત્વા નિર્વિકલ્પઃ સુખી ભવ ॥ ૧૦૯॥

એષ એવ મનોનાશસ્ત્વવિદ્યાનાશ એવ ચ ।
યત્તત્સંવેદ્યતે કિંચિત્તત્રાસ્થાપરિવર્જનમ્ ॥ ૧૧૦॥

અનાસ્થૈવ હિ નિર્વાણં દુઃખમાસ્થાપરિગ્રહઃ ॥ ૧૧૧॥

અવિદ્યા વિદ્યમાનૈવ નષ્ટપ્રજ્ઞેષુ દૃશ્યતે ।
નામ્નૈવાઙ્ગીકૃતાકારા સમ્યક્પ્રજ્ઞસ્ય સા કુતઃ ॥ ૧૧૨॥

તાવત્સંસારભૃગુષુ સ્વાત્મના સહ દેહિનમ્ ।
આન્દોલયતિ નીરન્ધ્રં દુઃખકણ્ટકશાલિષુ ॥ ૧૧૩॥

અવિદ્યા યાવદસ્યાસ્તુ નોત્પન્ના ક્ષયકારિણી ।
સ્વયમાત્માવલોકેચ્છા મોહસંક્ષયકારિણી ॥ ૧૧૪॥

અસ્યાઃ પરં પ્રપશ્યન્તાઃ સ્વાત્મનાશઃ પ્રજાયતે ।
દૃષ્ટે સર્વગતે બોધે સ્વયં હ્યેષા વિલીયતે ॥ ૧૧૫॥

ઇચ્છામાત્રમવિદ્યેયં તન્નાશો મોક્ષ ઉચ્યતે ।
સ ચાસંકલ્પમાત્રેણ સિદ્ધો ભવતિ વૈ મુને ॥ ૧૧૬॥

મનાગપિ મનોવ્યોમ્નિ વાસનારજની ક્ષયે ।
કાલિકા તનુતામેતિ ચિદાદિત્યાપ્રકાશનાત્ ॥ ૧૧૭॥

ચૈતાન્યુપાતરહિતં સામાન્યેન ચ સર્વગમ્ ।
યચ્ચિત્તત્ત્વમનાખ્યેયં સ આત્મા પરમેશ્વરઃ ॥ ૧૧૮॥

સર્વં ચ ખલ્વિદં બ્રહ્મ નિત્યચિદ્ઘનમક્ષતમ્ ।
કલ્પનાન્યા મનોનામ્ની વિદ્યતે ન હિ કાચન ॥ ૧૧૯॥

ન જાયતે ન મ્રિયત્તે કિંચિદત્ર જગત્ત્રયે ।
ન ચ ભાવવિકારાણાં સત્તા ક્વચન વિદ્યતે ॥ ૧૨૦॥

કેવલં કેવલાભાસં સર્વસામાન્યમક્ષતમ્ ।
ચૈત્યાનુપાતરહિતં ચિન્માત્રમિહ વિદ્યતે ॥ ૧૨૧॥

તસ્મિન્નિત્યે તતે શુદ્ધે ચિન્માત્રે નિરુપદ્રવે ।
શાન્તે શમસમાભોગે નિર્વિકારે ચિદાત્મનિ ॥ ૧૨૨॥

યૈષા સ્વભાવાભિમતં સ્વયં સંકલ્પ્ય ધાવતિ ।
ચિચ્ચૈત્યં સ્વયમમ્લાનં માનનાન્મન ઉચ્યતે ।
અતઃ સંકલ્પસિદ્ધેયં સંકલ્પેનૈવ નશ્યતિ ॥ ૧૨૩॥

નાહં બ્રહ્મેતિ સંકલ્પાત્સુદૃઢાદ્બધ્યતે મનઃ ।
સર્વં બ્રહ્મેતિ સંકલ્પાત્સુદૃઢાન્મુચ્યતે મનઃ ॥ ૧૨૪॥

કૃશોઽહં દુઃખબદ્ધોઽહં હસ્તપાદાદિમાનહમ્ ।
ઇતિ ભાવાનુરૂપેણ વ્યવહારેણ બધ્યતે ॥ ૧૨૫॥

નાહં દુઃખી ન મે દેહો બન્ધઃ કોઽસ્યાત્મનિ સ્થિતઃ ।
ઇતિ ભાવાનુરૂપેણ વ્યવહારેણ મુચ્યતે ॥ ૧૨૬॥

નાહં માંસં ન ચાસ્થીનિ દેહાદન્યઃ પરોઽસ્મ્યહમ્ ।
ઇતિ નિશ્ચિતવાનન્તઃ ક્ષીણાવિદ્યો વિમુચ્યતે ॥ ૧૨૭॥

કલ્પિતેયમવિદ્યેયમનાત્મન્યાત્મભાવનાત્ ।
પરં પૌરુષમાશ્રિત્ય યત્નાત્પરમયા ધિયા ।
ભોગેચ્છાં દૂરતસ્ત્યક્ત્વા નિર્વિકલ્પઃ સુખી ભવ ॥ ૧૨૮॥

મમ પુત્રો મમ ધનમહં સોઽયમિદં મમ ।
ઇતીયમિન્દ્રજાલેન વાસનૈવ વિવલ્ગતિ ॥ ૧૨૯॥

મા ભવાજ્ઞો ભવ જ્ઞસ્ત્વં જહિ સંસારભાવનામ્ ।
અનાત્મન્યાત્મભાવેન કિમજ્ઞ ઇવ રોદિષિ ॥ ૧૩૦॥

કસ્તવાયં જડો મૂકો દેહો માંસમયોઽશુચિઃ ।
યદર્થં સુખદુઃખાભ્યામવશઃ પરિભૂયસે ॥ ૧૩૧॥

અહો નુ ચિત્રં યત્સત્યં બ્રહ્મ તદ્વિસ્મૃતં નૃણામ્ ।
તિષ્ઠતસ્તવ કાર્યેષુ માસ્તુ રાગાનુરઞ્જના ॥ ૧૩૨॥

અહો નુ ચિત્રં પદ્મોત્થૈર્બદ્ધાસ્તન્તુભિરદ્રયઃ ।
અવિદ્યમાન યા વિદ્યા તયા વિશ્વં ખિલીકૃતમ્ ॥ ૧૩૩॥

ઇદં તદ્વજતાં યાતં તૃણમાત્રં જગત્ત્રયમ્ ॥

ઇત્યુપનિષત્ ॥ ઇતિ ચતુર્થોઽધ્યાયઃ ॥ ૪॥

ઋભુઃ ॥ અથાપરં પ્રવક્ષ્યામિ શૃણુ તાત યથાયથમ્ ।
અજ્ઞાનભૂઃ સપ્તપદા જ્ઞભૂઃ સપ્તપદૈવ હિ ॥ ૧॥

પદાન્તરાણ્યસંખ્યાનિ પ્રભવન્ત્યન્યથૈતયોઃ ।
સ્વરૂપાવસ્થિતિર્મુક્તિસ્તદ્ભ્રંશોઽહંત્વવેદનમ્ ॥ ૨॥

શુદ્ધસન્માત્રસંવિત્તેઃ સ્વરૂપાન્ન ચલન્તિ યે ।
રાગદ્વેષાદયો ભાવાસ્તેષાં નાજ્ઞત્વસંભવઃ ॥ ૩॥

યઃ સ્વરૂપપરિભ્રંશશ્ચેત્યાર્થે ચિતિ મજ્જનમ્ ।
એતસ્માદપરો મોહો ન ભૂતો ન ભવિષ્યતિ ॥ ૪॥

અર્થાદર્થાન્તરં ચિત્તે યાતિ મધ્યે તુ યા સ્થિતિઃ ।
સા ધ્વસ્તમનનાકારા સ્વરૂપસ્થિતિરુચ્યતે ॥ ૫॥

સંશાન્તસર્વસંકલ્પા યા શિલાવદવસ્થિતિઃ ।
જાગ્રન્નિદ્રાવિનિર્મુક્તા સા સ્વરૂપસ્થિતિઃ પરા ॥ ૬॥

અહન્તાંશે ક્ષતે શાન્તે ભેદનિષ્પન્દચિત્તતા ।
અજડા યા પ્રચલતિ તત્સ્વરૂપમિતીરિતમ્ ॥ ૭॥

બીજં જાગ્રત્તથા જાગ્રન્મહાજાગ્રત્તથૈવ ચ ।
જાગ્રત્સ્વપ્નસ્તથા સ્વપ્નઃ સ્વપ્નજાગ્રત્સુષુપ્તિકમ્ ॥ ૮॥

ઇતિ સપ્તવિધો મોહઃ પુનરેષ પરસ્પરમ્ ।
શ્લિષ્ટો ભવત્યનેકાગ્ર્યં શ્રુણુ લક્ષણમસ્ય તુ ॥ ૯॥

પ્રથમં ચેતનં યત્સ્યાદનાખ્યં નિર્મલં ચિતઃ ।
ભવિષ્યચ્ચિત્તજીવાદિનામશબ્દાર્થભાજનમ્ ॥ ૧૦॥

બીજરૂપસ્થિતં જાગ્રદ્બીજજાગ્રત્તદુચ્યતે ।
એષા જ્ઞપ્તેર્નવાવસ્થા ત્વજાગ્રત્સંસ્થિતિં શ્રુણુ ॥ ૧૧॥

નવપ્રસૂતસ્ય પરાદયં ચાહમિદં મમ ।
ઇતિ યઃ પ્રત્યયઃ સ્વસ્થસ્તજ્જાગ્રત્પ્રાગભાવનાત્ ॥ ૧૨॥

અયં સોઽહમિદં તન્મ ઇતિ જન્માન્તરોદિતઃ ।
પીવરઃ પ્રત્યયઃ પ્રોક્તો મહાજાગ્રદિતિ સ્ફુટમ્ ॥ ૧૩॥

અરૂઢમથવા રૂઢં સર્વથા તન્મયાત્મકમ્ ।
યજ્જાગ્રતો મનોરાજ્યં યજ્જાગ્રત્સ્વપ્ન ઉચ્યતે ॥ ૧૪॥

દ્વિચન્દ્રશુક્તિકારૂપ્યમૃગતૃષ્ણાદિભેદતઃ ।
અભ્યાસં પ્રાપ્ય જાગ્રત્તત્સ્વપ્નો નાનાવિધો ભવેત્ ॥ ૧૫॥

અલ્પકાલં મયા દૃષ્ટમેતન્નોદેતિ યત્ર હિ ।
પરામર્ષઃ પ્રબુદ્ધસ્ય સ સ્વપ્ન ઇતિ કથ્યતે ॥ ૧૬॥

ચિરં સંદર્શનાભાવાદપ્રફુલ્લં બૃહદ્વચઃ ।
ચિરકાલાનુવૃત્તિસ્તુ સ્વપ્નો જાગ્રદિવોદિતઃ ॥ ૧૭॥

સ્વપ્નજાગ્રદિતિ પ્રોક્તં જાગ્રત્યપિ પરિસ્ફુરત્ ।
ષડવસ્થા પરિત્યાગો જડા જીવસ્ય યા સ્થિતિઃ ॥ ૧૮॥

ભવિષ્યદ્દુઃખબોધાઢ્યા સૌષુપ્તિઃ સોચ્યતે ગતિઃ ।
જગત્તસ્યામવસ્થાયામન્તસ્તમસિ લીયતે ॥ ૧૯॥

સપ્તાવસ્થા ઇમાઃ પ્રોક્તા મયા જ્ઞાનસ્ય વૈ દ્વિજ ।
એકૈકા શતસંખ્યાત્ર નાનાવિભવરૂપિણી ॥ ૨૦॥

ઇમાં સપ્તપદાં જ્ઞાનભૂમિમાકર્ણયાનઘ ।
નાનયા જ્ઞાતયા ભૂયો મોહપઙ્કે નિમજ્જતિ ॥ ૨૧॥

વદન્તિ બહુભેદેન વાદિનો યોગભૂમિકાઃ ।
મમ ત્વભિમતા નૂનમિમા એવ શુભપ્રદાઃ ॥ ૨૨॥

અવબોધં વિદુર્જ્ઞાનં તદિદં સાપ્તભૂમિકમ્ ।
મુક્તિસ્તુ જ્ઞેયમિત્યુક્તા ભૂમિકાસપ્તકાત્પરમ્ ॥ ૨૩॥

જ્ઞાનભૂમિઃ શુભેચ્છાખ્યા પ્રથમા સમુદાહૃતા ।

વિચારણા દ્વિતીયા તુ તૃતીયા તનુમાનસી ॥ ૨૪॥

સત્ત્વાપત્તિશ્ચતુર્થી સ્યાત્તતોઽસંસક્તિનામિકા ।
પદાર્થભાવના ષષ્ઠી સપ્તમી તુર્યગા સ્મૃતા ॥ ૨૫॥

આસામન્તસ્થિતા મુક્તિર્યસ્યાં ભૂયો ન શોચતિ ।
એતાસાં ભૂમિકાનાં ત્વમિદં નિર્વચનં શ્રુણુ ॥ ૨૬॥

સ્થિતઃ કિં મૂઢ એવાસ્મિ પ્રેક્ષેઽહં શાસ્ત્રસજ્જનૈઃ ।
વૈરાગ્યપૂર્વમિચ્છેતિ શુભેચ્છેત્યુચ્યતે બુધૈઃ ॥ ૨૭॥

શાસ્ત્રસજ્જનસમ્પર્કવૈરાગ્યાભ્યાસપૂર્વકમ્ ।
સદાચારપ્રવૃત્તિર્યા પ્રોચ્યતે સા વિચારણા ॥ ૨૮॥

વિચારણાશુભેચ્છાભ્યામિન્દ્રિયાર્થેષુ રક્તતા ।
યત્ર સા તનુતામેતિ પ્રોચ્યતે તનુમાનસી ॥ ૨૯॥

ભૂમિકાત્રિતયાભ્યાસાચ્ચિત્તે તુ વિરતેર્વશાત્ ।
સત્ત્વાત્મનિ સ્થિતે શુદ્ધે સત્ત્વાપત્તિરુદાહૃતા ॥ ૩૦॥

દશાચતુષ્ટયાભ્યાસાદસંસર્ગકલા તુ યા ।
રૂઢસત્ત્વચમત્કારા પ્રોક્તા સંસક્તિનામિકા ॥ ૩૧॥

ભૂમિકાપઞ્ચકાભ્યાસાત્સ્વાત્મારામતયા દૃઢમ્ ।
આભ્યન્તરાણાં બાહ્યાનાં પદાર્થાનામભાવનાત્ ॥ ૩૨॥

પરપ્રયુક્તેન ચિરં પ્રયત્નેનાવબોધનમ્ ।
પદાર્થભાવના નામ ષષ્ઠી ભવતિ ભૂમિકા ॥ ૩૩॥

ભૂમિષટ્કચિરાભ્યાસાદ્ભેદસ્યાનુપલમ્ભનાત્ ।
યત્સ્વભાવૈકનિષ્ઠત્વં સા જ્ઞેયા તુર્યગા ગતિઃ ॥ ૩૪॥

એષા હિ જીવન્મુક્તેષુ તુર્યાવસ્થેતિ વિદ્યતે ।
વિદેહમુક્તિવિષયં તુર્યાતીતમતઃ પરમ્ ॥ ૩૫॥

યે નિદાઘ મહાભાગાઃ સાપ્તમીં ભૂમિમાશ્રિતાઃ ।
આત્મારામા મહાત્માનસ્તે મહત્પદમાગતાઃ ॥ ૩૬॥

જીવન્મુક્તા ન મજ્જન્તિ સુખદુઃખરસસ્થિતે ।
પ્રકૃતેનાથ કાર્યેણ કિંચિત્કુર્વન્તિ વા ન વા ॥ ૩૭॥

પાર્શ્વસ્થબોધિતાઃ સન્તઃ પૂર્વાચરક્રમાગતમ્ ।
આચારમાચરન્ત્યેવ સુપ્તબુદ્ધવદુત્થિતાઃ ॥ ૩૮॥

ભૂમિકાસપ્તકં ચૈતદ્ધીમતામેવ ગોચરમ્ ।
પ્રાપ્ય જ્ઞાનદશામેતાં પશુમ્લેચ્છાદયોઽપિ યે ॥ ૩૯॥

સદેહા વાપ્યદેહા વા તે મુક્તા નાત્ર સંશયઃ ।
જ્ઞપ્તિર્હિ ગ્રન્થિવિચ્છેદસ્તસ્મિન્સતિ વિમુક્તતા ॥ ૪૦॥

મૃગતૃષ્ણામ્બુબુદ્બુધ્યાદિશાન્તિમાત્રાત્મકસ્ત્વસૌ ।
યે તુ મોહાર્ણવાત્તીર્ણાસ્તૈઃ પ્રાપ્તં પરમં પદમ્ ॥ ૪૧॥

તે સ્થિતા ભૂમિકાસ્વાસુ સ્વાત્મલાભપરાયણાઃ ।
મનઃપ્રશમનોપાયો યોગ ઇત્યભિધીયતે ॥ ૪૨॥

સપ્તભૂમિઃ સ વિજ્ઞેયઃ કથિતાસ્તાશ્ચ ભૂમિકાઃ ।
એતાસાં ભૂમિકાનાં તુ ગમં બ્રહ્માભિધં પદમ્ ॥ ૪૩॥

ત્વત્તાહન્તાત્મતા યત્ર પરતા નાસ્તિ કાચન ।
ન ક્વચિદ્ભાવકલના ન ભાવાભાવ ગોચરા ॥ ૪૪॥

સર્વં શાન્તં નિરાલમ્બં વ્યોમસ્થં શાશ્વતં શિવમ્ ।
અનામયમનાભાસમનામકમકારણમ્ ॥ ૪૫॥

ન સન્નસન્ન મધ્યાન્તં ન સર્વં સર્વમેવ ચ ।
મનોવચોભિરગ્રાહ્યં પૂર્ણાત્પૂર્ણં સુખાત્સુખમ્ ॥ ૪૬॥

અસંવેદનમાશાન્તમાત્મવેદનમાતતમ્ ।
સત્તા સર્વપદાર્થાનાં નાન્યા સંવેદનાદૃતે ॥ ૪૭॥

સંબન્ધે દ્રષ્ટૃદૃશ્યાનાં મધ્યે દૃષ્ટિર્હિ યદ્વપુઃ ।
દ્રષ્ટૃદર્શનદૃશ્યાદિવર્જિતં તદિદં પદમ્ ॥ ૪૮॥

દેશાદ્દેશં ગતે ચિત્તે મધ્યે યચ્ચેતસો વઓઉઃ ।
અજાડ્યસંવિન્મનનં તન્મયો ભવ સર્વદા ॥ ૪૯॥

અજાગ્રત્સ્વપ્નનિદ્રસ્ય યત્તે રૂપં સનાતનમ્ ।
અચેતનં ચાજડં ચ તન્મયો ભવ સર્વદા ॥ ૫૦॥

જડતાં વર્જયિત્વૈકાં શિલાયા હૃદયં હિ તત્ ।
અમનસ્કસ્વરૂપં યત્તન્મયો ભવ સર્વદા ।
ચિત્તં દૂરે પરિત્યજ્ય યોઽસિ સોઽસિ સ્થિરો ભવ ॥ ૫૧॥

પૂર્વં મનઃ સમુદિતં પરમાત્મતત્ત્વા-
ત્તેનાતતં જગદિદં સવિકલ્પજાલમ્ ।
શૂન્યેન શૂન્યમપિ વિપ્ર યથામ્બરેણ
નીલત્વમુલ્લસતિ ચારુતરાભિધાનમ્ ॥ ૫૨॥

સંકલ્પસંક્ષયદ્વલિતે તુ ચિત્તે
સંસારમોહમિહિકા ગલિતા ભવન્તિ ।
સ્વચ્છં વિભાતિ શરદીવ ખમાગતાયાં
ચિન્માત્રમેકમજમાદ્યમનન્તમન્તઃ ॥ ૫૩॥

અકર્તૃકમરઙ્ગં ચ ગગને ચિત્રમુત્થિતમ્ ।
અદ્રષ્ટૃકં સ્વાનુભવમનિદ્રસ્વપ્નદર્શનમ્ ॥ ૫૪॥

સાક્ષિભૂતે સમે સ્વચ્છે નિર્વિકલ્પે ચિદાત્મનિ ।
નિરિચ્છં પ્રતિબિમ્બન્તિ જગન્તિ મુકુરે યથા ॥ ૫૫॥

એકં બ્રહ્મ ચિદાકાશં સર્વાત્મકમખણ્ડિતમ્ ।
ઇતિ ભાવય યત્નેન ચેતશ્ચાઞ્ચલ્યશાન્તયે ॥ ૫૬॥

રેખોપરેખાવલિતા યથૈકા પીવરી શિલા ।
તથા ત્રૈલોક્યવલિતં બ્રહ્મૈકમિહ દૃશ્યતામ્ ॥ ૫૭॥

દ્વિતીયકારણાભાવાદનુત્પન્નમિદં જગત્ ।
જ્ઞાતં જ્ઞાતવ્યમધુના દૃષ્ટં દ્રષ્ટવ્યમદ્ભુતમ્ ॥ ૫૮॥

વિશ્રાન્તોઽસ્મિ ચિરં શ્રાન્તશ્ચિન્માત્રાન્નાસ્તિ કિંચન ।
પશ્ય વિશ્રાન્તસન્દેહં વિગતાશેષકૌતુકમ્ ॥ ૫૯॥

નિરસ્તકલ્પનાજાલમચિત્તત્વં પરં પદમ્ ।
ત એવ ભૂમતાં પ્રાપ્તાઃ સંશાન્તાશેષકિલ્બિષાઃ ॥ ૬૦॥

મહાધિયઃ શાન્તધિયો યે યાતા વિમનસ્કતામ્ ।
જન્તોઃ કૃતવિચારસ્ય વિગલદ્વૃત્તિચેતસઃ ॥ ૬૧॥

મનનં ત્યજતો નિત્યં કિંચિત્પરિણતં મનઃ ।
દૃશ્યં સન્ત્યજતો હેયમુપાદેયમુપેયુષઃ ॥ ૬૨॥

દ્રષ્ટારં પશ્યતો નિત્યમદ્રષ્ટારમપશ્યતઃ ।
વિજ્ઞાતવ્યે પરે તત્ત્વે જાગરૂકસ્ય જીવતઃ ॥ ૬૩॥

સુપ્તસ્ય ઘનસંમોહમયે સંસારવર્ત્મનિ ।
અત્યન્તપક્વવૈરાગ્યાદરસેષુ રસેષ્વપિ ॥ ૬૪॥

સંસારવાસનાજાલે ખગજાલ ઇવાધુના ।
ત્રોટિતે હૃદયગ્રન્થૌ શ્લથે વૈરાગ્યરંહસા ॥ ૬૫॥

કાતકં ફલમાસાદ્ય યથા વારિ પ્રસીદતિ ।
તથા વિજ્ઞાનવશતઃ સ્વભાવઃ સમ્પ્રસીદતિ ॥ ૬૬॥

નીરાગં નિરુપાસઙ્ગં નિર્દ્વન્દ્વં નિરુપાશ્રયમ્ ।
વિનિર્યાતિ મનો મોહાદ્વિહઙ્ગઃ પઞ્જરાદિવ ॥ ૬૭॥

શાન્તસન્દેહદૌરાત્મ્યં ગતકૌતુકવિભ્રમમ્ ।
પરિપૂર્ણાન્તરં ચેતઃ પૂર્ણેન્દુરિવ રાજતે ॥ ૬૮॥

નાહં ન ચાન્યદસ્તીહ બ્રહ્મૈવાસ્મિ નિરામયમ્ ।
ઇત્થં સદસ્તોર્મધ્યાદ્યઃ પશ્યતિ સ પશ્યતિ ॥ ૬૯॥

અયત્નોપતેષ્વક્ષિદૃગ્દૃશ્યેષુ યથા મનઃ ।
નીરાગમેવ પતતિ તદ્વત્કાર્યેષુ ધીરધીઃ ॥ ૭૦॥

પરિજ્ઞાયોપભુક્તો હિ ભોગો ભવતિ તુષ્ટયે ।
વિજ્ઞાય સેવિતશ્ચોરો મૈત્રીમેતિ ન ચોરતામ્ ॥ ૭૧॥

અશઙ્કિતાપિ સમ્પ્રાપ્તા ગ્રામયાત્રા યથાધ્વગૈઃ ।
પ્રેક્ષ્યતે તદ્વદેવ જ્ઞૈર્ભોગશ્રીરવલોક્યતે ॥ ૭૨॥

મનસો નિગૃહીતસ્ય લીલાભોગોઽલ્પકોઽપિ યઃ ।
તમેવાલબ્ધવિસ્તારં ક્લિષ્ટત્વાદ્બહુ મન્યતે ॥ ૭૩॥

બદ્ધમુક્તો મહીપાલો ગ્રાસમાત્રેણ તુષ્યતિ ।
પરૈરબદ્ધો નાક્રાન્તો ન રાષ્ટ્રં બહુ મન્યતે ॥ ૭૪॥

હસ્તં હતેન સમ્પીડ્ય દન્તૈર્દન્તાન્વિચૂર્ણ્ય ચ ।

અઙ્ગાન્યઙ્ગૈરિવાક્રમ્ય જયેદાદૌ સ્વકં મનઃ ॥ ૭૫॥

મનસો વિજયાન્નાન્યા ગતિરસ્તિ ભવાર્ણવે ।
મહાનરકસામ્રાજ્યે મત્તદુષ્કૃતવારણાઃ ॥ ૭૬॥

આશાશરશલાકાઢ્યા દુર્જયા હીન્દ્રિયારયઃ ।
પ્રક્ષીણચિત્તદર્પસ્ય નિગૃહીતેન્દ્રિયદ્વિષઃ ॥ ૭૭॥

પદ્મિન્ય ઇવ હેમન્તે ક્ષીયન્તે ભોગવાસનાઃ ।
તાવન્નિશીવ વેતાલા વસન્તિ હૃદિ વાસનાઃ ।
એકતત્ત્વદૃઢાભ્યાસાદ્યાવન્ન વિજિતં મનઃ ॥ ૭૮॥

ભૃત્યોઽભિમતકર્તૃત્વાન્મન્ત્રી સર્વાર્થકારણાત્ ।
સામન્તશ્ચેન્દ્રિયાક્રાન્તેર્મનો મન્યે વિવેકિનઃ ॥ ૭૯॥

લાલનાત્સ્નિગ્ધલલના પાલાનાત્પાલકઃ પિતા ।
સુહૃદુત્તમવિન્યાસાન્મનો મન્યે મનીષિણઃ ॥ ૮૦॥

સ્વાલોકતઃ શાસ્ત્રદૃશા સ્વબુદ્ધ્યા સ્વાનુભાવતઃ ।
પ્રયચ્છતિ પરાં સિદ્ધિં ત્યક્ત્વાત્માનં મનઃપિતા ॥ ૮૧॥

સુહૃષ્ટઃ સુદૃઢઃ સ્વચ્છઃ સુક્રાન્તઃ સુપ્રબોધિતઃ ।
સ્વગુણેનોર્જિતો ભાતિ હૃદિ હૃદ્યો મનોમણિઃ ॥ ૮૨॥

એનં મનોમણિં બ્રહ્મન્બહુપઙ્કકલઙ્કિતમ્ ।
વિવેકવારિણા સિદ્ધ્યૈ પ્રક્ષાલ્યાલોકવાન્ભવ ॥ ૮૩॥

વિવેકં પરમાશ્રિત્ય બુદ્ધ્યા સત્યમવેક્ષ્ય ચ ।
ઇન્દ્રિયારીનલં છિત્ત્વા તીર્ણો ભવ ભવાર્ણવાત્ ॥ ૮૪॥

આસ્થામાત્રમનન્તાનાં દુઃખાનામાકરં વિદુઃ ।
અનાસ્થામાત્રમભિતઃ સુખાનામાલયં વિદુઃ ॥ ૮૫॥

વાસનાતન્તુબદ્ધોઽયં લોકો વિપરિવર્તતે ।
સા પ્રસિદ્ધાતિદુઃખાય સુખાયોચ્છેદમાગતા ॥ ૮૬॥

ધીરોઽપ્યતિબહુજ્ઞોઽપિ કુલજોઽપિ મહાનપિ ।
તૃષ્ણયા બધ્યતે જન્તુઃ સિંહઃ શૃઙ્ખલયા યથા ॥ ૮૭॥

પરમં પૌરુષં યત્નમાસ્થાદાય સૂદ્યમમ્ ।

યથાશાસ્ત્રમનુદ્વેગમાચરન્કો ન સિદ્ધિભાક્ ॥ ૮૮॥

અહં સર્વમિદં વિશ્વં પરમાત્માહમચ્યુતઃ ।
નાન્યદસ્તીતિ સંવિત્ત્યા પરમા સા હ્યહઙ્કૃતિઃ ॥ ૮૯॥

સર્વસ્માદ્વ્યતિરિક્તોઽહં વાલાગ્રાદપ્યહં તનુઃ ।
ઇતિ યા સંવિદો બ્રહ્મન્દ્વિતીયાહઙ્કૃતિઃ શુભા ॥ ૯૦॥

મોક્ષાયૈષા ન બન્ધાય જીવન્મુક્તસ્ય વિદ્યતે ॥ ૯૧॥

પાણિપાદાદિમાત્રોઽયમહમિત્યેષ નિશ્ચયઃ ।
અહંકારસ્તૃતીયોઽસૌ લૈકિકસ્તુચ્છ એવ સઃ ॥ ૯૨॥

જીવ એવ દુરાત્માસૌ કન્દઃ સંસારદુસ્તરોઃ ।
અનેનાભિહતો જન્તુરધોઽધઃ પરિધાવતિ ॥ ૯૩॥

અનયા દુરહંકૃત્યા ભાવાત્સંત્યક્તયા ચિરમ્ ।
શિષ્ટાહંકારવાઞ્જન્તુઃ શમવાન્યાતિ મુક્તતામ્ ॥ ૯૪॥

પ્રથમૌ દ્વાવહંકારાવઙ્ગીકૃત્ય ત્વલૌકિકૌ ।
તૃતીયાહંકૃતિસ્ત્યાજ્યા લૌકિકી દુઃખદાયિની ॥ ૯૫॥

અથ તે અપિ સંત્યજ્ય સર્વાહંકૃતિવર્જિતઃ ।
સ તિષ્ઠતિ તથાત્યુચ્ચૈઃ પરમેવાધિરોહતિ ॥ ૯૬॥

ભોગેચ્છામાત્રકો બન્ધસ્તત્ત્યાગો મોક્ષ ઉચ્યતે ।
મનસોઽભ્યુદયો નાશો મનોનાશો મહોદયઃ ॥ ૯૭॥

જ્ઞમનો નાશમભ્યેતિ મનોઽજ્ઞસ્ય હિ શૃઙ્ખલા ।
નાનન્દં ન નિરાનન્દં ન ચલં નાચલં સ્થિરમ્ ।
ન સન્નાસન્ન ચૈતેષાં મધ્યં જ્ઞાનિમનો વિદુઃ ॥ ૯૮॥

યથા સૌક્ષ્મ્યાચ્ચિદાભાસ્ય આકાશો નોપલક્ષ્યતે ।
તથા નિરંશશ્ચિદ્ભાવઃ સર્વગોઽપિ ન લક્ષ્યતે ॥ ૯૯॥

સર્વસંકલ્પરહિતા સર્વસંજ્ઞાવિવર્જિતા ।
સૈષા ચિદવિનાશાત્મા સ્વાત્મેત્યાદિકૃતાભિધા ॥ ૧૦૦॥

આકાશશતભાગાણ્છા જ્ઞેષુ નિષ્કલરૂપિણી ।
સકલામલસંસારસ્વરૂપૈકાત્મદર્શિની ॥ ૧૦૧॥

નાસ્તમેતિ ન ચોદેતિ નોત્તિષ્ઠતિ ન તિષ્ઠતિ ।
ન ચ યાતિ ન ચાયાતિ ન ચ નેહ ન ચેહ ચિત્ ॥ ૧૦૨॥

સૈષા ચિચમલાકારા નિર્વિકલ્પા નિરાસ્પદા ॥ ૧૦૩॥

આદૌ શમદમપ્રાયૈર્ગુણૈઃ શિષ્યં વિશોધયેત્ ।
પશ્ચાત્સર્વમિદં બ્રહ્મ શુદ્ધસ્ત્વમિતિ બોધયેત્ ॥ ૧૦૪॥

અજ્ઞસ્યાર્ધપ્રબુદ્ધસ્ય સર્વં બ્રહ્મેતિ યો વદેત્ ।
મહાનરકજાલેષુ સ તેન વિનિયોજિતઃ ॥ ૧૦૫॥

પ્રબુદ્ધબુદ્ધેઃ પ્રક્ષીણભોગેચ્છસ્ય નિરાશિષઃ ।
નાસ્ત્યવિદ્યામલમિતિ પ્રાજ્ઞસ્તૂપદિશેદ્ગુરુઃ ॥ ૧૦૬॥

સતિ દીપ ઇવાલોકઃ સત્યર્ક ઇવ વાસરઃ ।
સતિ પુષ્પ ઇવામોદશ્ચિતિ સત્યં જગત્તથા ॥ ૧૦૭॥

પ્રતિભાસત એવેદં ન જગત્પરમાર્થતઃ ।
જ્ઞાનદૃષ્ટૌ પ્રસન્નાયાં પ્રબોધવિતતોદયે ॥ ૧૦૮॥

યથાવજ્જ્ઞાસ્યસિ સ્વસ્થો મદ્વાગ્વૃષ્ટિબલાબલમ્ ।
અવિદ્યયૈવોત્તમયા સ્વાર્થનાશોદ્યમાર્થયા ॥ ૧૦૯॥

વિદ્યા સમ્પ્રાપ્યતે બ્રહ્મન્સર્વદોષાપહારિણી ।
શામ્યતિ હ્યસ્ત્રમસ્ત્રેણ મલેન ક્ષાલ્યતે મલમ્ ॥ ૧૧૦॥

શમં વિષં વિષેણૈતિ રિપુણા હન્યતે રિપુઃ ।
ઈદૃશી ભૂતમાયેયં યા સ્વનાશેન હર્ષદા ॥ ૧૧૧॥

ન લક્ષ્યતે સ્વભાવોઽસ્યા વીક્ષ્યમાણૈવ નશ્યતિ ।
નાસ્ત્યેષા પરમાર્થેનેત્યેવં ભાવનયેદ્ધયા ॥ ૧૧૨॥

સર્વં બ્રહ્મેતિ યસ્યાન્તર્ભાવના સા હિ મુક્તિદા ।
ભેદદૃષ્ટિરવિદ્યેયં સર્વથા તાં વિસર્જયેત્ ॥ ૧૧૩॥

મુને નાસાદ્યતે તદ્ધિ પદમક્ષયમુચ્યતે ।
કુતો જાતેયમિતિ તે દ્વિજ માસ્તુ વિચારણા ॥ ૧૧૪॥

ઇમાં કથમહં હન્મીત્યેષા તેઽસ્તુ વિચારણા ।

અસ્તં ગતાયાં ક્ષીણાયામસ્યાં જ્ઞાસ્યસિ તત્પદમ્ ॥ ૧૧૫॥

યત એષા યથા ચૈષા યથા નષ્ટેત્યખણ્ડિતમ્ ।
તદસ્યા રોગશાલાયા યત્નં કુરુ ચિકિત્સને ॥ ૧૧૬॥

યથૈષા જન્મદુઃખેષુ ન ભૂયસ્ત્વાં નિયોક્ષ્યતિ ।
સ્વાત્મનિ સ્વપરિસ્પન્દૈઃ સ્ફુરત્યચ્છૈશ્ચિદર્ણવઃ ॥ ૧૧૭॥

એકાત્મકમખણ્ડં તદિત્યન્તર્ભાવ્યતાં દૃઢમ્ ।
કિંચિત્ક્ષુભિતરૂપા સા ચિચ્છક્તિશ્ચિન્મયાર્ણવે ॥ ૧૧૮॥

તન્મયૈવ સ્ફુરત્યચ્છા તત્રૈવોર્મિરિવાર્ણવે ।
આત્મન્યેવાત્મના વ્યોમ્નિ યથા સરસિ મારુતઃ ॥ ૧૧૯॥

તથૈવાત્માત્મશક્ત્યૈવ સ્વાત્મન્યેવૈતિ લોલતામ્ ।
ક્ષણં સ્ફુરતિ સા દેવી સર્વશક્તિતયા તથા ॥ ૧૨૦॥

દેશકાલક્રિયાશક્તિર્ન યસ્યાઃ સમ્પ્રકર્ષણે ।
સ્વસ્વભાવં વિદિત્વોચ્ચૈરપ્યનન્તપદે સ્થિતા ॥ ૧૨૧॥

રૂપં પરિમિતેનાસૌ ભાવયત્યવિભાવિતા ।
યદૈવં ભાવિતં રૂપં તયા પરમકાન્તયા ॥ ૧૨૨॥

તદૈવૈનામનુગતા નામસંખ્યાદિકા દૃશઃ ।
વિકલ્પકલિતાકારં દેશકાલક્રિયાસ્પદમ્ ॥ ૧૨૩॥

ચિતો રૂપમિદં બ્રહ્મન્ક્ષેત્રજ્ઞ ઇતિ કથ્યતે ।
વાસનાઃ કલ્પયન્સોઽપિ યાત્યહંકારતાં પુનઃ ॥ ૧૨૪॥

અહઙ્કારો વિનિર્ણેતા કલઙ્કી બુદ્ધિરુચ્યતે ।
બુદ્ધિઃ સંકલ્પિતાકારા પ્રયાતિ મનનાસ્પદમ્ ॥ ૧૨૫॥

મનો ઘનવિકલ્પં તુ ગચ્છતીન્દ્રિયતાં શનૈઃ ।
પાણિપાદમયં દેહમિન્દ્રિયાણિ વિદુર્બુધાઃ ॥ ૧૨૬॥

એવં જીવો હિ સંકલ્પવાસનારજ્જુવેષ્ટિતઃ ।
દુઃખજાલપરીતાત્મા ક્રમાદાયાતિ નીચતામ્ ॥ ૧૨૭॥

ઇતિ શક્તિમયં ચેતો ઘનાહંકારતાં ગતમ્ ।
કોશકારક્રિમિરિવ સ્વેચ્છયા યાતિ બન્ધનમ્ ॥ ૧૨૮॥

સ્વયં કલ્પિત તન્માત્રાજાલભ્યન્તરવર્તિ ચ ।
પરાં વિવશતામેતિ શૃઙ્ખલાબદ્ધસિંહવત્ ॥ ૧૨૯॥

ક્વચિન્મનઃ ક્વચિદ્બુદ્ધિઃ ક્વચિજ્ જ્ઞાનં ક્વચિત્ક્રિયા ।
ક્વચિદેતદહંકારઃ ક્વચિચ્ચિત્તમિતિ સ્મૃતમ્ ॥ ૧૩૦॥

ક્વચિત્પ્રકૃતિરિત્યુક્તં ક્વચિન્માયેતિ કલ્પિતમ્ ।
ક્વચિન્મલમિતિ પ્રોક્તં ક્વચિત્કર્મેતિ સંસ્મૃતમ્ ॥ ૧૩૧॥

ક્વચિદ્બન્ધ ઇતિ ખ્યાતં ક્વચિત્પુર્યષ્ટકં સ્મૃતમ્ ।
પ્રોક્તં ક્વચિદવિદ્યેતિ ક્વચિદિચ્છેતિ સંમતમ્ ॥ ૧૩૨॥

ઇઅમં સંસારમખિલમાશાપાશવિધાયકમ્ ।
દધદન્તઃફલૈર્હીનં વટધાના વટં યથા ॥ ૧૩૩॥

ચિન્તાનલશિખાદગ્ધં કોપાજગરચર્વિતમ્ ।
કામાબ્ધિકલ્લોલરતં વિસ્મૃતાત્મપિતામહમ્ ॥ ૧૩૪॥

સમુદ્ધર મનો બ્રહ્મન્માતઙ્ગમિવ કર્દમાત્ ।
એવં જીવાશ્રિતા ભાવા ભવભાવનયાહિતાઃ ॥ ૧૩૫॥

બ્રહ્મણા કલ્પિતાકારા લક્ષશોઽપ્યથ કોટિશઃ ।
સંખ્યાતીતાઃ પુરા જાતા જાયન્તેઽદ્યાપિ ચાભિતઃ ॥ ૧૩૬॥

ઉત્પત્સ્યન્તેઽપિ ચૈવાન્યે કણૌઘા ઇવ નિર્ઝરાત્ ।
કેચિત્પ્રથમજન્માનઃ કેચિજ્જન્મશતાધિકાઃ ॥ ૧૩૭॥

કેચિચ્ચાસંખ્યજન્માનઃ કેચિદ્દ્વિત્રિભવાન્તરાઃ ।
કેચિત્કિન્નરગન્ધર્વવિદ્યાધરમહોરગાઃ ॥ ૧૩૮॥

કેચિદર્કેન્દુવરુણાસ્ત્ર્યક્ષાધોક્ષજપદ્મજાઃ ।
કેચિદ્બ્રહ્મણભૂપાલવૈશ્યશૂદ્રગણાઃ સ્થિતાઃ ॥ ૧૩૯॥

કેચિત્તૃણૌષધીવૃક્ષફલમૂલપતઙ્ગકાઃ ।
કેચિત્કદમ્બજમ્બીરસાલતાલતમાલકાઃ ॥ ૧૪૦॥

કેચિન્મહેન્દ્રમલયસહ્યમન્દરમેરવઃ ।
કેચિત્ક્ષારોદધિક્ષીરઘૃતેક્ષુજલરાશયઃ ॥ ૧૪૧॥

કેચિદ્વિશાલાઃ કુકુભઃ કેચિન્નદ્યો મહારયાઃ ।
વિહાયસ્યુચ્ચકૈઃ કેચિન્નિપતન્ત્યુત્પતન્તિ ચ ॥ ૧૪૨॥

કન્તુકા ઇવ હસ્તેન મૃત્યુનાઽવિરતં હતાઃ ।
ભુક્ત્વા જન્મસહસ્રાણિ ભૂયઃ સંસારસંકટે ॥ ૧૪૩॥

પતન્તિ કેચિદબુધાઃ સમ્પ્રાપ્યાપિ વિવેકતામ્ ।
દિક્કાલાદ્યનવચ્છિન્નમાત્મતત્ત્વં સ્વશક્તિતઃ ॥ ૧૪૪॥

લીલયૈવ યદાદત્તે દિક્કાલકલિતં વપુઃ ।
તદેવ જીવપર્યાયવાસનાવેશતઃ પરમ્ ॥ ૧૪૫॥

મનઃ સમ્પદ્યતે લોલં કલનાકલનોન્મુખમ્ ।
કલયન્તી મનઃશક્તિરાદૌ ભાવયતિ ક્ષણાત્ ॥ ૧૪૬॥

આકાશભાવનામચ્છાં શબ્દબીજરસોન્મુખીમ્ ।
તતસ્તદ્ઘનતાં યાતં ઘનસ્પન્દક્રમાન્મનઃ ॥ ૧૪૭॥

ભાવયત્યનિલસ્પન્દં સ્પર્શબીજરસોન્મુખમ્ ।
તાભ્યામાકાશવાતાભ્યાં દૃઢાભ્યાસવશાત્તતઃ ॥ ૧૪૮॥

શબ્દસ્પર્શસ્વરૂપાભ્યાં સંઘર્ષાજ્જન્યતેઽનલઃ ।
રૂપતન્માત્રસહિતં ત્રિભિસ્તૈઃ સહ સંમિતમ્ ॥ ૧૪૯॥

મનસ્તાદૃગ્ગુણગતં રસતન્માત્રવેદનમ્ ।
ક્ષણાચ્ચેતત્યપાં શૈત્યં જલસંવિત્તતો ભવેત્ ॥ ૧૫૦॥

તતસ્તાદૃગ્ગુણગતં મનો ભાવયતિ ક્ષણાત્ ।
ગન્ધતન્માત્રમેતસ્માદ્ભૂમિસંવિત્તતો ભવેત્ ॥ ૧૫૧॥

અથેત્થંભૂતતન્માત્રવેષ્ટિતં તનુતાં જહત્ ।
વપુર્વહ્નિકણાકારં સ્ફુરિતં વ્યોમ્નિ પશ્યતિ ॥ ૧૫૨॥

અહંકારકલાયુક્તં બુદ્ધિબીજસમન્વિતમ્ ।
તત્પુર્યષ્ટકમિત્યુક્તં ભૂતહૃત્પદ્મષટ્પદમ્ ॥ ૧૫૩॥

તસ્મિંસ્તુ તીવ્રસંવેગાદ્ભાવયદ્ભાસુરં વપુઃ ।
સ્થૂલતામેતિ પાકેન મનો બિલ્વફલં યથા ॥ ૧૫૪॥

મૂષાસ્થદ્રુતહેમાભં સ્ફુરિતં વિમલામ્બરે ।

સંનિવેશમથાદત્તે તત્તેજઃ સ્વસ્વભાવતઃ ॥ ૧૫૫॥

ઊર્ધ્વં શિરઃપિણ્ડમયમધઃ પાદમયં તથા ।
પાર્શ્વયોર્હસ્તસંસ્થાનં મધ્યે ચોદરધર્મિણમ્ ॥ ૧૫૬॥

કાલેન સ્ફુટતામેત્ય ભવત્યમલવિગ્રહમ્ ।
બુદ્ધિસત્ત્વબલોત્સાહવિજ્ઞાનૈશ્વર્યસંસ્થિતઃ ॥ ૧૫૭॥

સ એવ ભગવાન્બ્રહ્મા સર્વલોકપિતામહઃ ।
અવલોક્ય વપુર્બ્રહ્મા કાન્તમાત્મીયમુત્તમમ્ ॥ ૧૫૮॥

ચિન્તામભ્યેત્ય ભગવાંસ્ત્રિકાલામલદર્શનઃ ।
એતસ્મિન્પરમાકાશે ચિન્માત્રૈકાત્મરૂપિણી ॥ ૧૫૯॥

અદૃષ્ટપારપર્યન્તે પ્રથમં કિં ભવેદિતિ ।
ઇતિ ચિન્તિતવાન્બ્રહ્મા સદ્યો જાતામલાત્મદૃક્ ॥ ૧૬૦॥

અપશ્યત્સર્ગવૃન્દાનિ સમતીતાન્યનેકશઃ ।
સ્મરત્યથો સ સકલાન્સર્વધર્મગુણક્રમાત્ ॥ ૧૬૧॥

લીલયા કલ્પયામાસ ચિત્રાઃ સંકલ્પતઃ પ્રજાઃ ।
નાનાચારસમારમ્ભા ગન્ધર્વનગરં યથા ॥ ૧૬૨॥

તાસાં સ્વર્ગાપવર્ગાર્થં ધર્મકામાર્થસિદ્ધયે ।
અનન્તાનિ વિચિત્રાણિ શાસ્ત્રાણિ સમકલ્પયત્ ॥ ૧૬૩॥

વિરઞ્ચિરૂપાન્મનસઃ કલ્પિતત્વાજ્જગત્સ્થિતેઃ ।
તાવત્સ્થિતિરિયં પ્રોક્તા તન્નાશે નાશમાપ્નુયાત્ ॥ ૧૬૪॥

ન જાયતે ન મ્રિયતે ક્વચિત્કિંચિત્કદાચન ।
પરમાર્થેન વિપ્રેન્દ્ર મિથ્યા સર્વં તુ દૃશ્યતે ॥ ૧૬૫॥

કોશમાશાભુજઙ્ગાનાં સંસારાડંબરં ત્યજ ।
અસદેતદિતિ જ્ઞાત્વા માતૃભાવં નિવેશય ॥ ૧૬૬॥

ગન્ધર્વનગરસ્યાર્થે ભૂષિતેઽભૂષિતે તથા ।
અવિદ્યાંશે સુતાદૌ વા કઃ ક્રમઃ સુખદુઃખયોઃ ॥ ૧૬૭॥

ધનદારેષુ વૃદ્ધેષુ દુઃખયુક્તં ન તુષ્ટતા ।
વૃદ્ધાયાં મોહમાયાયાં કઃ સમાશ્વાસવાનિહ ॥ ૧૬૮॥

યૈરેવ જાયતે રાગો મૂર્ખસ્યાધિકતાં ગતૈઃ ।
તૈરેવ ભાગૈઃ પ્રાજ્ઞસ્ય વિરાગ ઉપજાયતે ॥ ૧૬૯॥

અતો નિદાઘ તત્ત્વજ્ઞ વ્યવહારેષુ સંસૃતેઃ ।
નષ્ટં નષ્ટમુપેક્ષસ્વ પ્રાપ્તં પ્રાપ્તમુપાહર ॥ ૧૭૦॥

અનાગતાનાં ભોગાનામવાઞ્છનમકૃત્રિમમ્ ।
આગતાનાં ચ સંભોગ ઇતિ પણ્ડિતલક્ષણમ્ ॥ ૧૭૧॥

શુદ્ધં સદસતોર્મધ્યં પદં બુદ્ધ્વાવલંબ્ય ચ ।
સબાહ્યાભ્યન્તરં દૃશ્યં મા ગૃહાણ વિમુઞ્ચ મા ॥ ૧૭૨॥

યસ્ય ચેચ્છા તથાનિચ્છા જ્ઞસ્ય કર્મણિ તિષ્ઠતઃ ।
ન તસ્ય લિપ્યતે પ્રજ્ઞા પદ્મપત્રમિવામ્બુભિઃ ॥ ૧૭૩॥

યદિ તે નેન્દ્રિયાર્થશ્રીઃ સ્પન્દતે હૃદિ વૈ દ્વિજ ।
તદા વિજ્ઞાતવિજ્ઞેયા સમુત્તીર્ણો ભવાર્ણવાત્ ॥ ૧૭૪॥

ઉચ્ચૈઃપદાય પરયા પ્રજ્ઞયા વાસનાગણાત્ ।
પુષ્પાદ્ગન્ધમપોહ્યારં ચેતોવૃત્તિં પૃથક્કુરુ ॥ ૧૭૫॥

સંસારામ્બુનિધાવસ્મિન્વાસનામ્બુપરિપ્લુતે ।
યે પ્રજ્ઞાનાવમારૂઢાસ્તે તીર્ણાઃ પણ્ડિતાઃ પરે ॥ ૧૭૬॥

ન ત્યજન્તિ ન વાઞ્છન્તિ વ્યવહારં જગદ્ગતમ્ ।
સર્વમેવાનુવર્તન્તે પારાવારવિદો જનાઃ ॥ ૧૭૭॥

અનન્તસ્યાત્મતત્ત્વસ્ય સત્તાસામાન્યરૂપિણઃ ।
ચિતશ્ચેત્યોન્મુખત્વં યત્તત્સંકલ્પાઙ્કુરં વિદુઃ ॥ ૧૭૮॥

લેશતઃ પ્રાપ્તસત્તાકઃ સ એવ ઘનતાં શનૈઃ ।
યાતિ ચિત્તત્વમાપૂર્ય દૃઢં જાડ્યાય મેઘવત્ ॥ ૧૭૯॥

ભાવયન્તિ ચિતિશ્ચૈત્યં વ્યતિરિક્તમિવાત્મનઃ ।
સંકલ્પતામિવાયાતિ બીજમઙ્કુરતામિવ ॥ ૧૮૦॥

સંકલ્પનં હિ સંકલ્પઃ સ્વયમેવ પ્રજાયતે ।
વર્ધતે સ્વયમેવાશુ દુઃખાય ન સુખાય યત્ ॥ ૧૮૧॥

મા સંકલ્પય સંકલ્પં મા ભાવં ભાવય સ્થિતૌ ।
સંકલ્પનાશને યત્તો ન ભૂયોઽનનુગચ્છતિ ॥ ૧૮૨॥

ભાવનાભાવમાત્રેણ સંકલ્પઃ ક્ષીયતે સ્વયમ્ ।
સંકલ્પેનૈવ સંકલ્પં મનસૈવ મનો મુને ॥ ૧૮૩॥

છિત્ત્વા સ્વાત્મનિ તિષ્ઠ ત્વં કિમેતાવતિ દુષ્કરમ્ ।
યથૈવેદં નભઃ શૂન્યં જગચ્છૂન્યં તથૈવ હિ ॥ ૧૮૪॥

તણ્ડુલસ્ય યથા ચર્મ યથા તામ્રસ્ય કાલિમા ।
નશ્યતિ ક્રિયયા વિપ્ર પુરુષસ્ય તથા મલમ્ ॥ ૧૮૫॥

જીવસ્ય તણ્ડુલસ્યેવ મલં સહજમપ્યલમ્ ।
નશ્યત્યેવ ન સન્દેહસ્તસ્માદુદ્યોગવાન્ભવેત્ ॥ ૧૮૬॥

ઇતિ મહોપનિષત્ ॥ ઇતિ પઞ્ચમોઽધ્યાયઃ ॥ ૫॥

અન્તરાસ્થાં પરિત્યજ્ય ભાવશ્રીં ભાવનામયીમ્ ।
યોઽસિ સોઽસિ જગત્યસ્મિંલ્લીલયા વિહરાનઘ ॥ ૧॥

સર્વત્રાહમકર્તેતિ દૃઢભાવનયાનયા ।
પરમામૃતનામ્ની સા સમતૈવાવશિષ્યતે ॥ ૨॥

ખેદોલ્લાસવિલાસેષુ સ્વાત્મકર્તૃતયૈકયા ।
સ્વસંકલ્પે ક્ષયં યાતે સમતૈવાવશિષ્યતે ॥ ૩॥

સમતા સર્વભાવેષુ યાસૌ સત્યપરા સ્થિતિઃ ।
તસ્યામવસ્થિતં ચિત્તં ન ભૂયો જન્મભાગ્ભવેત્ ॥ ૪॥

અથવા સર્વકર્તૃત્વમકર્તૃત્વં ચ વૈ મુને ।
સર્વં ત્યક્ત્વા મનઃ પીત્વા યોઽસિ સોઽસિ સ્થિરો ભવ ॥ ૫॥

શેષસ્થિરો સમાધાનો યેન ત્યજસિ તત્ત્યજ ।
ચિન્મનઃકલનાકારં પ્રકાશતિમિરાદિકમ્ ॥ ૬॥

વાસનાં વાસિતારં ચ પ્રાણસ્પન્દનપૂર્વકમ્ ।
સમૂલમખિલં ત્યક્ત્વા વ્યોમસામ્યઃ પ્રશાન્તધીઃ ॥ ૭॥

હૃદયાત્સમ્પરિત્યજ્ય સર્વવાસનપઙ્ક્તયઃ ।
યસ્તિષ્ઠતિ ગતવ્યગ્રઃ સ મુક્તઃ પરમેશ્વરઃ ॥ ૮॥

દૃષ્ટં દ્રષ્ટવ્યમખિલં ભ્રાન્તં ભ્રાન્ત્યા દિશો દશ ।
યુક્ત્યા વૈ ચરતો જ્ઞસ્ય સંસારો ગોષ્પદાકૃતિઃ ॥ ૯॥

સબાહ્યાભ્યન્તરે દેહે હ્યધ ઊર્ધ્વં ચ દિક્ષુ ચ ।
ઇત આત્મા તતોઽપ્યાત્મા નાસ્ત્યનાત્મમયં જગત્ ॥ ૧૦॥

ન તદસ્તિ ન યત્રાહં ન તદસ્તિ ન તન્મયમ્ ।
કિમન્યદભિવાઞ્છામિ સર્વં સચ્ચિન્મયં તતમ્ ॥ ૧૧॥

સમસ્તં ખલ્વિદં બ્રહ્મ સર્વમાત્મેદમાતતમ્ ।
અહમન્ય ઇદં ચાન્યદિતિ ભ્રાન્તિં ત્યજાનઘ ॥ ૧૨॥

તતે બ્રહ્મઘને નિત્યે સંભવન્તિ ન કલ્પિતાઃ ।
ન શોકોઽસ્તિ ન મોહોઽસ્તિ ન જરાસ્તિ ન જન્મ વા ॥ ૧૩॥

યદસ્તીહ તદેવાસ્તિ વિજ્વરો ભવ સર્વદા ।
યથાપ્રાપ્તાનુભવતઃ સર્વત્રાનભિવાઞ્છનાત્ ॥ ૧૪॥

ત્યાગાદાનપરિત્યાગી વિજ્વરો ભવ સર્વદા ।
યસ્યેદં જન્મ પાશ્ચાત્યં તમાશ્વેવ મહામતે ॥ ૧૫॥

વિશન્તિ વિદ્યા વિમલા મુક્તા વેણુમિવોત્તમમ્ ।
વિરક્તમનસાં સમ્યક્સ્વપ્રસઙ્ગાદુદાહૃતમ્ ॥ ૧૬॥

દ્રષ્ટુર્દૃશ્યસમાયોગાત્પ્રત્યયાનન્દનિશ્ચયઃ ।
યસ્તં સ્વમાત્મતત્ત્વોત્થં નિષ્પન્દં સમુપાસ્મહે ॥ ૧૭॥

દ્રષ્ટૃદર્શનદૃશ્યાનિ ત્યક્ત્વા વાસનયા સહ ।
દર્શનપ્રત્યયાભાસમાત્માનં સમુપાસ્મહે ॥ ૧૮॥

દ્વયોર્મધ્યગતં નિત્યમસ્તિનાસ્તીતિ પક્ષયોઃ ।
પ્રકાશનં પ્રકાશાનામાત્માનં સમુપાસ્મહે ॥ ૧૯॥

સન્ત્યજ્ય હૃદ્ગુહેશાનં દેવમન્યં પ્રયાન્તિ યે ।
તે રત્નમભિવાઞ્છન્તિ ત્યક્તહસ્તસ્થકૌસ્તુભાઃ ॥ ૨૦॥

ઉત્થિતાનુત્થિતાનેતાનિન્દ્રિયારીન્પુનઃ પુનઃ ।
હન્યાદ્વિવેકદણ્ડેન વજ્રેણેવ હરિર્ગિરીન્ ॥ ૨૧॥

સંસારરાત્રિદુઃસ્વપ્ને શૂન્યે દેહમયે ભ્રમે ।
સર્વમેવાપવિત્રં તદ્દૃષ્ટં સંસૃતિવિભ્રમમ્ ॥ ૨૨॥

અજ્ઞાનોપહતો બાલ્યે યૌવને વનિતાહતઃ ।
શેષે કલત્રચિન્તાર્તઃ કિં કરોતિ નરાધમઃ ॥ ૨૩॥

સતોઽસત્તા સ્થિતા મૂર્ધ્નિ રમ્યાણાં મૂર્ધ્ન્યરમ્યતા ।
સુખાનાં મૂર્ધ્નિદુઃખાનિ કિમેકં સંશ્રયામ્યહમ્ ॥ ૨૪॥

યેષાં નિમેષણામેષૌ જગતઃ પ્રલયોદયૌ ।
તાદૃશાઃ પુરુષા યાન્તિ માદૃશાં ગણનૈવ કા ॥ ૨૫॥

સંસાર એવ દુઃખાનાં સીમાન્ત ઇતિ કથ્યતે ।
તન્મધ્યે પતિતે દેહે સુખમાસાદ્યતે કથમ્ ॥ ૨૬॥

પ્રબુદ્ધોઽસ્મિ પ્રબુદ્ધોઽસ્મિ દુષ્ટશ્ચોરોઽયમાત્મનઃ ।
મનો નામ નિહન્મ્યેનં મનસાસ્મિ ચિરં હૃતઃ ॥ ૨૭॥

મા ખેદં ભજ હેયેષુ નોપાદેયપરો ભવ ।
હેયાદેયાદૃશૌ ત્યક્ત્વા શેષસ્થઃ સુસ્થિરો ભવ ॥ ૨૮॥

નિરાશતા નિર્ભયતા નિત્યતા સમતા જ્ઞતા ।
નિરીહતા નિષ્ક્રિયતા સૌમ્યતા નિર્વિકલ્પતા ॥ ૨૯॥

ધૃતિર્મૈત્રી મનસ્તુષ્ટિર્મૃદુતા મૃદુભાષિતા ।
હેયોપાદેયનિર્મુક્તે જ્ઞે તિષ્ઠન્ત્યપવાસનમ્ ॥ ૩૦॥

ગૃહીતતૃષ્ણાશબરીવાસનાજાલમાતતમ્ ।
સંસારવારિપ્રસૃતં ચિન્તાતન્તુભિરાતતમ્ ॥ ૩૧॥

અનયા તીક્ષ્ણયા તાત છિન્ધિ બુદ્ધિશલાકયા ।
વાત્યયેવામ્બુદં જાલં છિત્ત્વા તિષ્ઠ તતે પદે ॥ ૩૨॥

મનસૈવ મનશ્છિત્ત્વા કુઠારેણેવ પાદપમ્ ।
પદં પાવનમાસાદ્ય સદ્ય એવ સ્થિરો ભવ ॥ ૩૩॥

તિષ્ઠન્ગચ્છન્સ્વપઞ્જાગ્રન્નિવસન્નુત્પતન્પતન્ ।
અસદેવેદમિત્યન્તં નિશ્ચિત્યાસ્તાં પરિત્યજ ॥ ૩૪॥

દૃશ્યમાશ્રયસીદં ચેત્તત્સચ્ચિતોઽસિ બન્ધવાન્ ।

દૃશ્યં સન્ત્યજસીદં ચેત્તદાઽચિત્તોઽસિ મોક્ષવાન્ ॥ ૩૫॥

નાહં નેદમિતિ ધ્યાયંસ્તિષ્ઠ ત્વમચલાચલઃ ।
આત્મનો જગતશ્ચાન્તર્દ્રષ્ટૃદૃશ્યદશાન્તરે ॥ ૩૬॥

દર્શનાખ્યં સ્વમાત્માનં સર્વદા ભાવયન્ભવ ।
સ્વાદ્યસ્વાદકસંત્યક્તં સ્વાદ્યસ્વાદકમધ્યગમ્ ॥ ૩૭॥

સ્વદનં કેવલં ધ્યાયન્પરમાત્મમયો ભવ ।
અવલમ્બ્ય નિરાલમ્બં મધ્યેમધ્યે સ્થિરો ભવ ॥ ૩૮॥

રજ્જુબદ્ધા વિમુચ્યન્તે તૃષ્ણાબદ્ધા ન કેનચિત્ ।
તસ્માન્નિદાઘ તૃષ્ણા ત્વં ત્યજ સંકલ્પવર્જનાત્ ॥ ૩૯॥

એતામહંભાવમયીપપુણ્યાં
        છિત્ત્વાનહંભાવ શલાકયૈવ ॥
સ્વભાવજાં ભવ્યભવન્તભૂમૌ
        ભવ પ્રશાન્તાખિલભૂતભીતિઃ ॥ ૪૦॥

અહમેષાં પદાર્થાનામેતે ચ મમ જીવિતમ્ ।
નાહમેભિર્વિના કિંચિન્ન મયૈતે વિના કિલ ॥ ૪૧॥

ઇત્યન્તર્નિશ્ચયં ત્યક્ત્વા વિચાર્ય મનસા સહ ।
નાહં પદાર્થસ્ય ન મે પદાર્થ ઇતિ ભાવિતે ॥ ૪૨॥

અન્તઃશીતલયા બુદ્ધ્યા કુર્વતો લીલયા ક્રિયામ્ ।
યો નૂનં વાસનાત્યાગો ધ્યેયો બ્રહ્મન્પ્રકીર્તિતઃ ॥ ૪૩॥

સર્વં સમતયા બુદ્ધ્યા યઃ કૃત્વા વાસનાક્ષયમ્ ।
જહાતિ નિર્મમો દેહં નેયોઽસૌ વાસનાક્ષયઃ ॥ ૪૪॥

અહંકારમયીં ત્યક્ત્વા વાસનાં લીલયૈવ યઃ ।
તિષ્ઠતિ ધ્યેયસંત્યાગી સ જીવન્મુક્ત ઉચ્યતે ॥ ૪૫॥

નિર્મૂલં કલનાં ત્યક્ત્વા વાસનાં યઃ શમં ગતઃ ।
જ્ઞેયં ત્યાગમિમં વિદ્ધિ મુક્તં તં બ્રાહ્મણોત્તમમ્ ॥ ૪૬॥

દ્વાવેતૌ બ્રહ્મતાં યાતૌ દ્વાવેતૌ વિગતજ્વરૌ ।
આપતત્સુ યથાકાલં સુખદુઃખેષ્વનારતૌ ।

સંન્યાસિયોગિનૌ દાન્તૌ વિદ્ધિ શાન્તૌ મુનીશ્વર ॥ ૪૭॥

ઈપ્સિતાનીપ્સિતે ન સ્તો યસ્યાન્તર્વર્તિદૃષ્ટિષુ ।
સુષુપ્તવદ્યશ્ચરતિ સ જીવન્મુક્ત ઉચ્યતે ॥ ૪૮॥

હર્ષામર્ષભયક્રોધકામકાર્પણ્યદૃષ્ટિભિઃ ।
ન હૃષ્યતિ ગ્લાયતિ યઃ પરામર્શવિવર્જિતઃ ॥ ૪૯॥

બાહ્યાર્થવાસનોદ્ભૂતા તૃષ્ણા બદ્ધેતિ કથ્યતે ।
સર્વાર્થવાસનોન્મુક્તા તૃષ્ણા મુક્તેતિ ભણ્યતે ॥ ૫૦॥

ઇદમસ્તુ મમેત્યન્તમિચ્છાં પ્રાર્થનયાન્વિતામ્ ।
તાં તીક્ષ્ણાં શૃઙ્ખલાં વિદ્ધિ દુઃખજન્મભયપ્રદામ્ ॥ ૫૧॥

તામેતાં સર્વભાવેષુ સત્સ્વસત્સુ ચ સર્વદા ।
સંત્યજ્ય પરમોદારં પદમેતિ મહામનાઃ ॥ ૫૨॥

બન્ધાસ્થામથ મોક્ષાસ્થાં સુખદુઃખદશામપિ ।
ત્યક્ત્વા સદસદાસ્થાં ત્વં તિષ્ઠાક્ષુબ્ધમહાબ્ધિવત્ ॥ ૫૩॥

જાયતે નિશ્ચયઃ સાધો પુરુષસ્ય ચતુર્વિધઃ ॥ ૫૪॥

આપાદમસ્તકમહં માતાપિતૃવિનિર્મિતઃ ।
ઇત્યેકો નિશ્ચયો બ્રહ્મન્બન્ધાયાસવિલોકનાત્ ॥ ૫૫॥

અતીતઃ સર્વભાવેભ્યો વાલાગ્રાદપ્યહં તનુઃ ।
ઇતિ દ્વિતીયો મોક્ષાય નિશ્ચયો જાયતે સતામ્ ॥ ૫૬॥

જગજ્જાલ પદાર્થાત્મા સર્વ એવાહમક્ષયઃ ।
તૃતીયો નિશ્ચયશ્ચોક્તો મોક્ષાયૈવ દ્વિજોત્તમ ॥ ૫૭॥

અહં જગદ્વા સકલં શૂન્યં વ્યોમ સમં સદા ।
એવમેષ ચતુર્થોઽપિ નિશ્ચયો મોક્ષસિદ્ધિદઃ ॥ ૫૮॥

એતેષાં પ્રથમઃ પ્રોક્તસ્તૃષ્ણયા બન્ધયોગ્યયા ।
શુદ્ધતૃષ્ણાસ્ત્રયઃ સ્વચ્છા જીવન્મુક્તા વિલાસિનઃ ॥ ૫૯॥

સર્વં ચાપ્યહમેવેતિ નિશ્ચયો યો મહામતે ।
તમાદાય વિષાદાય ન ભૂયો જાયતે મતિઃ ॥ ૬૦॥

શૂન્યં તત્પ્રકૃતિર્માયા બ્રહ્મવિજ્ઞાનમિત્યપિ ।
શિવઃ પુરુષ ઈશાનો નિત્યમાત્મેતિ કથ્યતે ॥ ૬૧॥

દ્વૈતાદ્વૈતસમુદ્ભૂતૈર્જગન્નિર્માણલીલયા ।
પરમાત્મમયીશક્તિરદ્વૈતૈવ વિજૃમ્ભતે ॥ ૬૨॥

સર્વાતીતપદાલમ્બી પરિપૂર્ણૈકચિન્મયઃ ।
નોદ્વેગી ન ચ તુષ્ટાત્મા સંસારે નાવસીદતિ ॥ ૬૩॥

પ્રાપ્તકર્મકરો નિત્યં શત્રુમિત્રસમાનદૃક્ ।
ઈહિતાનીહિતૈર્મુક્તો ન શોચતિ ન કાઙ્ક્ષતિ ॥ ૬૪॥

સર્વસ્યાભિમતં વક્તા ચોદિતઃ પેશલોક્તિમાન્ ।
આશયજ્ઞશ્ચ ભૂતાનાં સંસારે નાવસીદતિ ॥ ૬૫॥

પૂર્વાં દૃષ્ટિમવષ્ટભ્ય ધ્યેયત્યાગવિલાસિનીમ્ ।
જીવન્મુક્તતયા સ્વસ્થો લોકે વિહર વિજ્વરઃ ॥ ૬૬॥

અન્તઃસંત્યક્તસર્વાશો વીતરાગો વિવાસનઃ ।
બહિઃસર્વસમાચારો લોકે વિહર વિજ્વરઃ ॥ ૬૭॥

બહિઃકૃત્રિમસંરંભો હૃદિ સંરમ્ભવર્જિતઃ ।
કર્તા બહિરકર્તાન્તર્લોકે વિહર શુદ્ધધીઃ ॥ ૬૮॥

ત્યક્તાહંકૃતિરાશ્વસ્તમતિરાકાશશોભનઃ ।
અગૃહીતકલઙ્કાઙ્કો લોકે વિહર શુદ્ધધીઃ ॥ ૬૯॥

ઉદારઃ પેશલાચારઃ સર્વાચારાનુવૃત્તિમાન્ ।
અન્તઃસઙ્ગપરિત્યાગી બહિઃસંભારવાનિવ ।
અન્તર્વૈરાગ્યમાદાય બહિરાશોન્મુખેહિતઃ ॥ ૭૦॥

અયં બન્ધુરયં નેતિ ગણના લઘુચેતસામ્ ।
ઉદારચરિતાનાં તુ વસુધૈવ કુટુમ્બકમ્ ॥ ૭૧॥

ભાવાભાવવિનિર્મુક્તં જરામરણવર્જિતમ્ ।
પ્રશાન્તકલનારભ્યં નીરાગં પદમાશ્રય ॥ ૭૨॥

એષા બ્રાહ્મી સ્થિતિઃ સ્વચ્છા નિષ્કામા વિગતામયા ।
આદાય વિહરન્નેવં સંકટેષુ ન મુહ્યતિ ॥ ૭૩॥

વૈરાગ્યેણાથ શાસ્ત્રેણ મહત્ત્વાદિગુણૈરપિ ।
યત્સંકલ્પહરાર્થં તત્સ્વયમેવોન્નયેન્મનઃ ॥ ૭૪॥

વૈરાગ્યાત્પૂર્ણતામેતિ મનો નાશવશાનુગમ્ ।
આશયા રક્તતામેતિ શરદીવ સરોઽમલમ્ ॥ ૭૫॥

તમેવ ભુક્તિવિરસં વ્યાપારૌઘં પુનઃ પુનઃ ।
દિવસેદિવસે કુર્વન્પ્રાજ્ઞ કસ્માન્ન લજ્જતે ॥ ૭૬॥

ચિચ્ચૈત્યકલિતો બન્ધસ્તન્મુક્તૌ મુક્તિરુચ્યતે ।
ચિદચૈત્યા કિલાત્મેતિ સર્વસિદ્ધાન્તસંગ્રહઃ ॥ ૭૭॥

એતન્નિશ્ચયમાદાય વિલોકય ધિયેદ્ધયા ।
સ્વયમેવાત્મનાત્માનમાનન્દં પદમાપ્સ્યસિ ॥ ૭૮॥

ચિદહં ચિદિમે લોકાશ્ચિદાશાશ્ચિદિમાઃ પ્રજાઃ ।
દૃશ્યદર્શનનિર્મુક્તઃ કેવલામલરૂપવાન્ ॥ ૭૯॥

નિત્યોદિતો નિરાભાસો દ્રષ્ટા સાક્ષી ચિદાત્મકઃ ॥ ૮૦॥

ચૈત્યનિર્મુક્તચિદ્રૂપં પૂર્ણજ્યોતિઃસ્વરૂપકમ્ ।
સંશાન્તસર્વસંવેદ્યં સંવિન્માત્રમહં મહત્ ॥ ૮૧॥

સંશાન્તસર્વસંકલ્પઃ પ્રશાન્તસકલેષણઃ ।
નિર્વિકલ્પપદં ગત્વા સ્વસ્થો ભવ મુનીશ્વર ॥ ૮૨॥ ઇતિ ।
ય ઇમાં મહોપનિષદં બ્રાહ્મણો નિત્યમધીતે ।
અશ્રોત્રિયઃ શ્રોત્રિયો ભવતિ । અનુપનીત ઉપનીતો ભવતિ ।
સોઽગ્નિપૂતો ભવતિ । સ વાયુપૂતો ભવતિ । સ સોમપૂતો ભવતિ ।
સ સત્યપૂતો ભવતિ । સ સર્વપૂતો ભવતિ । સ સર્વૈર્દેવૈર્જ્ઞાતો ભવતિ ।
સ સર્વેષુ તીર્થેષુ સ્નાતો ભવતિ । સ સર્વૈર્દેવૈરનુધ્યાતો ભવતિ ।
સ સર્વક્રતુભિરિષ્ટવાન્ભવતિ । ગાયત્ર્યાઃ ષષ્ટિસહસ્રાણિ
જપ્તાનિ ફલાનિ ભવન્તિ । ઇતિહાસપુરાણાનાં શતસહસ્રાણિ જપ્તાનિ
ફલાનિ ભવન્તિ । પ્રણવાનામયુતં જપ્તં ભવતિ ।
આચક્ષુષઃ પઙ્ક્તિં પુનાતિ । આસપ્તમાન્પુરુષયુગાન્પુનાતિ ।
ઇત્યાહ ભગવાન્ હિરણ્યગર્ભઃ । જપ્યેનામૃતત્ત્વં ચ
ગચ્છતીત્યુપનિષત્ । ॥ ઇતિ ષષ્ઠોઽધ્યાયઃ ॥ ૬॥

ॐ આપ્યાયન્તુ મમાઙ્ગાનિ વાક્પ્રાણશ્ચક્ષુઃ શ્રોત્રમથો
બલમિન્દ્રિયાણિ ચ ॥ સર્વાણિ સર્વં બ્રહ્મોપનિષદં માહં
બ્રહ્મ નિરાકુર્યાં મા મા બ્રહ્મ નિરાકરોદનિરાકરણમ-
સ્ત્વનિરાકરણં મેસ્તુ તદાત્મનિ નિરતે ય ઉપનિષત્સુ ધર્માસ્તે
મયિ સન્તુ તે મયિ સન્તુ ॥ ॐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥

ઇતિ મહોપનિષત્સમાપ્તા ॥

Encoded by Sunder Hattangadi (sunderh@hotmail.com)

.. Maha Upanishad ..

Searchable pdf was typeset using XeTeXgenerateactualtext feature of XƎLATEX 0.99996

on August 20, 2017

Please send corrections to *sanskrit@cheerful.com*